## भाषायाः उपयोगः

भाषायाः उपयोगो मानवजीवने अवश्यमेव स्वीकार्यः। संसारयात्रायाम् अनुवर्तनकाले प्रतिमुहूर्तम् अनुभूयन्ते बहुविधानि प्रयोजनानि। तेषां मध्ये कानिचन स्थूलानि अन्नवस्त्राश्रयादिरूपाणि। स्थूलैर्द्रव्यैरेव तेषां सिद्धिर्भवति। कानिचन च भावात्मकानि। शिक्षाधर्मदर्शनादिभिरेव तेषां परिपूर्तिर्भवति। आद्यपक्षे यद्यपि द्रव्यैरेव प्रयोजनसिद्धिर्भवितुम् अर्हति तथापि तेषां भेदादिसूचनाय भाषावलम्बनीया। द्वितीयपक्षे तु भाषैव प्रयोजनसंसाधिका। अत एव भाषा मानवानामन्तरिन्द्रियविशिष्टानां महती सम्पद्। प्रयोजनसिद्ध्यर्थं मानवा भाषामेव साधनत्वेन व्यवहरन्ति।

## भाषायाः स्वरूपम्

भावप्रत्यायनव्यापारे यत्साधनं भवति सैव भाषा इत्यस्माकं प्राथमिकः प्रत्ययः। तेन च बहुविधा विषया भाषारूपेण गण्यन्ते तेषां विभिन्नभावाभिव्यञ्जकत्वात्। यथा --

१) पशुपक्षिणां रवाः। रवाणां भावाभिव्यञ्जकत्वं दृश्यते-- अवस्थाविशेषे शोकहर्षादिप्रकाशकाले गवादीनां शब्देषु वायसादीनां च रवेषु स्थूलतया साम्येऽपि सूक्ष्मतया भेदः प्रतीयते।

क) उत्तरथाइल्याण्डदेशे गीवनजातीयवानराः प्रयोजनानुसारेण नवविधं शब्दं कर्तुं शक्नुवन्ति इति प्राणितत्त्वविदः मन्यन्ते।

ख) मार्जाराः प्रतिद्वन्द्विदर्शनकाले शावकह्वानसमये च विभिन्नं शब्दं कुर्वन्ति।

ग) शोककाले वायसादीनां रवेषु पार्थक्यम् अनुभूयते।

घ) शुकपक्षिणः मनुष्यवाचम् अनुकुर्वन्ति।

२) मनुष्याणामाकार-इङ्गित-चेष्टा-इत्यादीनां भावद्योतकत्वमस्ति।

क) मानवानां शीर्णं शरीरं दैर्बल्यं, पुष्टं च शरीरं नीरोगत्वं सूचयति।

ख) मानवा नेत्रहस्तमस्तकादिभिः इङ्गितं कुर्वन्ति --

अ) नेत्रसंकोचनेन निषेधः, क्रोधः, प्रसन्नता च ज्ञाप्यते।

आ) हस्तसंकेतेन आगमनम् अपसारणं निषेधश्च प्रत्यायते।

इ) शिरसः आन्दोलनेन सम्मतिः, असम्मतिः, श्रद्धा च विज्ञायते।

ग) भूमौ पदाघातः क्रोधं, त्वरितगमनञ्च असहिष्णुतां गमयति।

घ) मूकजनस्य वाचिकी भाषा नास्ति। तस्येङ्गितादिकं सर्वान् आवश्यकीयान् भावान् ज्ञापयति। वाक्पटूनामपि हस्तसञ्चालनादिकं भाषायाः परिपोषकं भवति।

३) प्रतीकानां चिह्नानामालोकादीनां च विधिनिषेधादिज्ञापकता -

क) स्वस्तिकादिचिह्नं शुभत्वादिकं बोधयति।

ख) ध्वजादिप्रदर्शनं लौहयानस्य नियन्त्रकं भवति।

ग) दूरभाषणयन्त्रचित्रं दूरभाषणं बोधयति।

घ) लौहिताद्यालोकप्रदर्शनं पथि यानानां गमनागमनं नियन्त्रयति।

अपि च, स्रोतस्विनीनां शब्दः पर्वतानां गाम्भीर्यं समुद्राणां कल्लोलः , अरण्यानां मर्मरा भाषात्वेन गृह्यन्ते। वस्तुतः एतेषां भाषात्वं नास्त्येव। तथापि भाषात्वेन तेषां व्यवहार औपचारिक एव।

अतो भावप्रकाशने समर्थं यदेव साधनं भवति सैव भाषा इति स्वीकारे भाषासंज्ञायाः अतिव्याप्तिर्भवति। तस्मात् भाषायास्तु प्रकृतं स्वरूपमवश्यमेव ज्ञातव्यम्।

भाषाशब्दस्य व्युत्पत्तिः भाषाया वैशिष्ट्यं किञ्चित् प्रतिपादयति। भाष व्यक्तायां वाचि इति निर्देशात् व्यक्ता वागेव भाषेति अवगम्यते। व्यक्तत्वमिह स्फुटत्वं स्थानकरणादिभिः उच्चार्यमाणत्वम्। तथाहि निरुक्तटीकायां व्यक्तवाचो मनुष्यादयः अव्यक्तवाचश्च गवादय इत्युक्तम्। तस्मान्मनुष्याणां कण्ठोग्दीर्णा स्फुटा वागेव भाषेति अवधार्यते।

वाक् तु शब्दसमूहरूपा, शब्दश्च ध्वनिसमूहात्मकः, ध्वनिस्तु इह पदार्थबोधकः। तथा चोक्तं भाष्यकारेण - ‘प्रतीतपदार्थको लोके ध्वनिः शब्दः इत्युच्यते’। अत एव , भाषायामर्थबोधकध्वनीनामेव समावेशः। अर्थबोधकता च लोके व्यवहर्तृषु यदृच्छाक्रमेण स्थिरीक्रियते। एक एव गोशब्दः वङ्गदेशे यमर्थं बोधयति इंल्याण्डदेशे न तमर्थम्।

अत एव भणितं भाषाचार्यैः सुनीतिकुमारटचोपाध्यायैः - মনের ভাব প্রকাশের জন্য বাগযন্ত্রের সাহায্যে উচ্চারিত ধ্বনির দ্বারা নিষ্পন্ন কোনো বিশেষ জনসমাজে ব্যবহৃত স্বতন্ত্রভাবে অবস্থিত তথা বাক্যে প্রযুক্ত শব্দসমষ্টিকে ভাষা বলে।

एवमन्येऽपि भाषास्वरूपं भाषान्तरेण कथयन्ति। तेषां मध्ये स्तुर्तेभाँमहोदयेनोक्तं - ‘A Language is a system of arbitrary vocal symbols by means of which members of a social group co-operate and interact’.

एनसाइक्लोपेडियाब्रिटानिकाग्रन्थेऽपि एवं कथितम् - “Language may be defined as an arbitrary system of vocal symbols by means of which human beings, as members of a social group and participant in calture, interact and communicate.”

एड्ओयार्ड-महोदयेनापि कथितं - “Language is a peerly human and non-instinctive method of communicative ideas, imotions, and desires by means of voluntarily produced symbols.”

वस्तुतः भाषायाः सकलवैशिष्ट्यसंसूचिका संज्ञा अधुनापि न निरूपिता। तथापि यानि वैशिष्ट्यानि भाषायाः उपर्य्युल्लिखितानि तानि पुनः समासतः उपस्थाप्यन्ते -

१) भाषा खलु शब्दसमूहरूपा।

२) शब्दाश्च ध्वनिसमूहात्मकाः।

३) ध्वनयश्च वाक्यन्त्रोच्चारितप्रतीकरूपाः।

४) भावेन अर्थेन वा सह शब्दानां सम्बन्धः यादृच्छिक एव , न तु नियतरूपः। अतः शब्दानां व्यवहारो भाषाविशेषे स्वतन्त्रतया निर्दिष्टः।

५) शब्दास्तु जनगोष्ठीविशेषे भावविशेषाभिव्यञ्जकाः।

६) शब्दा वाक्ये प्रयोक्तव्या। एवमर्थसमाप्तिसम्भवात् शब्दाः पूर्णतया भावाभिव्यञ्जका भवन्ति।

७) भाषा तु भावप्रकाशनव्यापारेऽन्यतमा पद्धतिः।

८) पद्धतिश्च वाचिकी, न तु आङ्गिकी प्रतीकमयी वा।

९) भाषा वक्त्रा वक्तव्या, श्रोत्रा च श्रोतव्या।

१०) भाषा वक्तृहृदयगतानां भावानां प्रकाशिका।

११) भाषा च न केवलं जैववृत्तिसाधिका, अपि तु सर्वविधप्रयोजननिर्वाहिका।

१२) भाषापद्धतिस्तु पुनः पुनः अभ्यासेन स्वायत्तीकर्तव्या। न तु सा मनुष्याणां स्वाभाविकप्रवृत्तिरूपा।

**भाषा च उपभाषा च**

मानवानां गोष्ठीविशेषे भाषाविशेषो व्यवह्रियते। गोष्ठीविशेषस्य जनसंख्या कुत्रचित् स्वल्पा कुत्रचिच्च अधिका। अत एव भाषाविशेषस्य व्यवहारता क्वचिन्मण्डलवासिनः क्वचित् प्रदेशवासिनः , क्वचिच्च देशवासिनो वा। यदा देशस्यायतनं बृहत्तरं बृहत्तमं वा भवति तदा भाषाविशेषः देशमध्ये सर्वत्र एकरूपो न। वस्तुतः प्रतिजनं ध्वनीनामुच्चारणे , शब्दानां व्यवहारे, वाक्यानां च प्रयोगे भिन्नता दृश्यते। यदि कुत्रचिद् विभागत्वरूपेण नदी, पर्वतः, अरण्यं वा वर्तते तर्हि भाषाविशेषस्य व्यवहारे अवश्यमेव किञ्चित् पार्थक्यं जायते। सत्यपि पार्थक्ये बोधगम्यता नान्तर्हिता भवति। भाषाविशेषभाषिणश्च सर्वे वक्तृणां मनोभावं भाषाद्वारेणैवावगच्छन्ति। किन्तु यदा पार्थक्यं प्रबलतरं भवति तदा ध्वनिभेदः रूपभेदः वाक्यभेदः अर्थभेदस्तु जायते। फलतः भाषाभेदः सम्पद्यते। आर्यावर्तीयाः सर्वा एव नव्यभारतीया भाषा हिन्दीबङ्गादयः अपभ्रंशभाषातः उद्भूताः अपि इदानीं विभिन्नभाषात्वेन गृह्यन्ते।

कदाचित् मूलभाषामध्ये स्थानिको भेदः परिलक्ष्यते। स्थानविशेषस्य एतादृशी भाषा मूलभाषान्तर्गता उपभाषारूपेण गण्यते। ध्वनिभेदस्योदाहरणं यथा - पश्चिमबङ्गेषु क-घ-द-ध-भाः व्यवह्रियन्ते किन्तु पूर्ववङ्गेषु एषां स्थाने यथाक्रमं ह-ग-ड-द-बाः तिष्ठन्ति। अत एव पश्चिमबङ्गेषु बङ्गभाषायां चाकर-घा-ढाक्-धान्-भाइ-इत्यादयः शब्दाः परिवर्तिताः सन्तः पूर्ववङ्गेषु चाहर -गा-डाक्-दान्-बाइ-इत्यादयः प्रयुज्यन्ते। शब्दभेदो यथा पश्चिमबङ्गेषु व्यवहृतानां 'बाताबिलेबु', 'पेयारा', 'मर्तमान् कला', 'चिरुणी' - इत्यादीनां शब्दानां स्थले पूर्वबङ्गेषु 'जाम्बुरा' , 'गैया', 'सव्-री कला', 'काँकई' - इत्यादयो व्यवह्रियन्ते। वाक्यलिपिभेदोऽपि यथा - पश्चिमबङ्गेषु 'दोकान् करा' इत्यस्य स्थले पूर्वबङ्गेषु 'दोकान् देओया' इति प्रयोगो भवति। एवमेव पश्चिमबङ्गीया उपभाषा पूर्वबङ्गीया उपभाषा च बङ्गभाषामध्ये एव प्रचलति।

अत एव सुकुमारसेनमहोदयेन उपभाषायाः संज्ञा एवंविधा विहिता - 'কোন ভাষাসম্প্রদায়ের অন্তর্গত ছোট ছোট দলে বা অঞ্চলে বিশেষ প্রচলিত ভাষার ছাঁদকে উপভাষা বলে।' तस्मान्मूलभाषाव्यवहारकाले यदा ध्वनिगतः शब्दगतः वाक्यरीतिगतो वा स्थानिको भेदः सुप्रकटितो भवति तदा उपभाषायाः उद्भवो भवति।

कथ्यसंस्कृतेऽपि उदीची उपभाषा आसीत्। कौषीतकि- ब्राह्मणे आम्नातम् - 'उदीच्यां दिशि प्रज्ञाततरा वागुद्यते' इति। अत्र षडरुशिष्येण व्याख्यातमेवं - प्रज्ञाततरा वाग् उद्यते। पूर्वतः काश्मीरे सरस्वती कीर्त्यते, बदरिकाश्रमे वेदघोषः श्रूयते इति।

## भाषायाः उद्भवः

अस्माभिरिदानीं भाषा व्यवह्रियते। तत्र काठिन्यं किमपि नानुभूयते। यथास्माकं श्वासक्रिया प्रवर्तते तथैव भाषाप्रयोगो ऽपि अनायासेनैव सम्पाद्यते। किन्तु पृथिव्यां यदा मनुष्याणामाविर्भावो जातस्तदा तेषां भाषा नासीत्। नृतत्त्वविदां मते मानवानां विवर्तनं सम्भूतम्। प्रथमे पर्वणि वानररूपिणः पिथेक्यान्थ्रोपास्-मानवाः, ततः प्रत्नप्रस्तरयुगीयाः पिकिङ्-मनुष्याः, हाइटेल्बार्ग्-मानुषाः, नियाण्डारथालमानुषाः, ततश्च नव्यप्रस्तरयुगीया क्रोम्याग्ननमानुष्याः, ततश्च खीष्टपूर्व-६५००-तमे अब्दे अस्मत्सदृशाः आधुनिकमानवाः होमो-स्यापियेन्साख्याः चिन्तनसमर्थाः आविर्भूताः आसन्। नृविज्ञानमते आदौ मानवाः पशुपक्षिणः इव अव्यक्तं शब्दं कर्तुं समर्था आसन्। ततः नव्यप्रस्तरयुगे एव मनुष्याणां भाषाप्रयोगसामर्थ्यं सञ्जातम्। ततः प्रभृति वाच्यवाचकसम्बन्धयुक्ताः शब्दः भाषायां व्यवह्रियते। अर्थात् सार्थकध्वनिसमूहस्योच्चारणं क्रियते। किन्तु इदानीं पृच्छा जायते कथं मनुष्यैः वाच्यवाचकसम्बन्धनिरूपणपूर्विका भाषा प्रयुक्ता। अर्थात् भाषाया उत्पत्तिः कथं सम्भूतेति। अस्मिन् विषये न किमपि प्रत्यक्षं प्रमाणम् उपलभ्यते, तथापि भाषातत्त्वविद्भिः केचन मतवादाः एतद्विषये आद्रीयन्ते। त एव इदानीम् उपस्थाप्यन्ते समीक्ष्यन्ते च।

**१) दिव्योत्पत्तिवादः ( Divine Origin Theory)** - प्राचीनो वादोऽयं आस्तिक्यधीसम्पन्नैरेव अभ्युपगम्यते। तेषां मते ईश्वरेच्छानुसारेण यथा मानवा उत्पन्ना मनुजैश्च स्वरयन्त्रं लब्धं, तथैव ते ईश्वरानुग्रहेणैव व्यक्तवाचो भवन्ति, भाषाव्यवहारिणोऽपि भवन्ति। अत्र धर्मग्रन्था एव प्रमाणभूताः -

क) i) भारतीयानामार्याणाम् ऋग्वेदरूपे मूर्धनीभूते धर्मग्रन्थे आम्नातम् - 'देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति' इति (ऋ. ८.१००.११)। अत्र यास्काचार्यकृतं व्याख्यानम् एवं दृश्यते - देवीं वाचमजनयन्त देवास्तां सर्वरूपाः पशवो वदन्ति, व्यक्तवाचश्च अव्यक्तवाचश्च इति (निरुक्त ११.१९)। अस्यापि व्याख्यानकाले दुर्गाचार्येणोक्तं - 'व्यक्तवाचो मनुष्यादयः अव्यक्तवाचो गवादयः' इति।

ii) बृहदारण्यकोपनिषदि श्रूयते - 'अस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः' इति।

iii) काव्यादर्शकारेणोक्तं 'संस्कृतं नाम दैवी वाक्' इति। न केवलमेतत् ईश्वरविदितत्वाद् देवभाषात्वेन अभ्युपेता संस्कृतभाषा सर्वासामेव भाषाणां जननीस्वरूपा इति प्राचीनानां भारतीयानामुद्घोषः।

ख) बोद्धानां मते पालिभाषा मूलीभूता भाषा।

ग) जैना अपि मन्यन्ते यद् अर्धमागधी भाषा न केवलं मनुष्याणामपि तु सर्वेषामेव प्राणिनां भाषा।

घ) खृष्टधर्मावलम्बिनः विशेषतः क्याथलिकसम्प्रदायभूक्ता जना विश्वन्ति यद् एका एव भाषा हिब्रुरूपा जगदीश्वरेण सृष्टा। बाइवेलग्रन्थस्य प्राचीनाभिधाने एकादशेऽध्याये उक्तं - 'And the whole earth was of one language and of one speech'.

ङ) इस्लामधर्मावलम्बिनोऽपि कोरानस्य भाषाम् आरवीरूपाम् ईश्वरवचनत्वेन गृह्णन्ति।

अत एव जार्मानदेशीयेन सुसमिल्स्-महोदयेन सिद्धान्तितं - "Language could not have been invented by man but was a direct gift from God" - Otto Jespersen Language, p. 27. (अटो इयेस्पार्सेन)

**समीक्षा** - भाषाया उत्पत्तिविषये यद्यपि दिव्योत्पत्तिवादः धर्मग्रन्थेषु संसूचितस्तथापि सर्वथा स न ग्राह्यः। यतो हि

क) वादोऽयं धर्मीयविश्वासानुसारी, न तु युक्त्या समर्थितः। प्रायशः सर्व एव धर्मावलम्बिनः तत्तद्धर्मीयभाषामादिभाषात्वेन देवभाषात्वेन वा कल्पयन्ति।

ख) मानवानां भाषा यदि ईश्वरसृष्टा अभविष्यत् तर्हि विश्वेऽस्मिन् संसारे मानवीभाषा मनुष्येतरप्राणिनां रुतिरिव अभिन्नं रूपम् अभविष्यत्।

ग) मानवी भाषा यदि ईश्वरेच्छया निर्मिता अभविष्यत् तर्हि मनुष्याणामविर्भावकालादारभ्य एव ता अधिगता अभविष्यत्। वास्तविकपक्षे भाषा शिक्षासापेक्षा, न तु स्वतः प्रकाशमाना।

घ) भाषा यदि ईश्वरकृता स्यात् तर्हि सा परिवर्तनशीला विकाशशीला न भवेत्।

ङ) अष्टादशशताब्द्यां जार्मानदेशीयेन हार्डार-महोदयेन Origin of Language – इत्याख्ये निबन्धे ज्ञापितं यद् ईश्वरसृष्टा चेत् भाषा प्रथमत एव अस्याः सुव्यवस्थितत्वं त्रुटिविहीनत्वं च सिद्धं स्यात्। वस्तुतः सर्वा एव भाषा अव्यवस्थिता दृश्यन्ते।

अत एव दिव्योत्पत्तिवादः ग्रहणयोग्यो न भवति, किन्तु वादोऽयं न सर्वथा गुरुत्वहीनः। मनुष्याणां स्वरयन्त्रं प्रकृतिप्रदत्तम् ईश्वरप्रदत्तं वा अश्यमेव भवति, अन्यथा गवादय इव मनुष्या अपि अव्यक्तवाचोऽभविष्यन्।

**२) ध्वन्यनुकृतिवादः (The Onomato poetic Theory)** – शब्दसमूहात्मकं वाक्यम्। शब्दस्तु अर्थवहो भवति। अनुन्नतानां मानवानां यद्यपि शब्दसम्पत् समृद्धा न भवति तथापि तैरपि भावव्यञ्जकः शब्दः व्यवह्रियते , आङ्गिकसंकेतश्च क्रियते। इत्थं च भाषान्तर्गता सर्व एव शब्दा अर्थबोधका भवन्ति। किन्तु कस्मिन्नर्थे कस्य शब्दस्य प्रयोगो जात इति जिज्ञासायाम् ऊनविंशशताब्द्यां ग्रीम -रेरन-इयेसपार्सन-प्रभृतयः बहवः पण्डिताः उत्तरस्यानुसन्धानं कृतवन्तः। म्याक्समूलरेण ध्वन्यनुकृतिवादः अभ्युपगतः विदशीकृतः समेक्षितश्च। एतद्वादानुसारेण प्राणिनां जडवस्तूनां च नामकरणं प्राणिकृतस्य शब्दस्य जडवस्तुम्भूतस्य वा शब्दस्य अनुकरणं कृत्वा सञ्जातम्। एतद्विषयमवलम्ब्य म्याक्समूलारेणापि विस्तृततया वादचतुष्टयं विवेचितम्। यथा - क) शब्दानुकृतिवादः

ख) भावाभिव्यक्तिवादः

ग) अनुरणनवादः

घ) श्रमध्वनिवादश्चेति।

तत्र **क) शब्दानुकृतिवादः रवानुकृतिवादो वा (The Bow-wow Theory)** – अस्मत्सहवासिनः पशुपक्षिणः बहवः सम्भवन्ति। ते विविधं रवं कुर्वन्ति। तेषां नामकरणकाले तेषामेव रवान् अनुकृत्य तत् क्रियते। वायसाः का -का इति रवं कुर्वन्ति अत एव संस्कृते बङ्गभाषायाञ्च काक इति वायसनाम जातम्। एवं काकशब्दः वायसवाचको भवति। कोकिलः कु -कु-इति रवं करोति अत एव कोकिलं बोधयितुम् आङ्गलभाषायां cuckoo इति प्रयुज्यते। मार्जारः म्याउ-इति शब्दं करोति अत एव चीन-भाषायां मार्जारस्य नाम म्याउ इति जातम्। बङ्गदेशे शिशवः श्वानं दृष्ट्वा वदन्ति, 'ঘেউ ঘেউ আসছে' इति। एवं वङ्गभाषायां घु-घु, बौ-कथा-कउ इत्यादयः शब्दाः, संस्कृते केका इत्यादयश्च शब्दाः पक्षिरवानुकरणमूला दृश्यन्ते।

यास्काचार्यस्य निरुक्तग्रन्थे वादस्यास्य सूचना दृश्यते। तत्र इमं विषयमधिकृत्य वचनानि बहुन्येव सन्ति। तेषां कानिचन यथा - अ) काक इति शब्दानुकृतिः।

आ) तदिदं शकुनिषु बहुलम् (निरुक्त ११.१८)

इ) कृकवाकुः। कृकवाको पूर्वं शब्दानुकरणं वचेरुत्तमम्। (नि. १२.१३)

ई) कितवः। किं तव अस्तीति शब्दानुकृतिः।

**समीक्षा** - रेनान-महोदयेन शब्दानुकृतिवादस्य दोषा उद्भाविताः। यथा - अ) अस्मिन् जगति मानवगोष्ठीभेदेन भाषाभेदो दृश्यते। अत एव भाषाणां संख्या अनल्पा भवन्ति। तत्र अनुकृतिमूलकाः शब्दाः अत्यल्पाः भवन्ति। प्रतिशतम् एकोऽपि तादृशः शब्दो नास्ति।

आ) तादृशी काचित् भाषापि अस्ति यस्यां ध्वन्यनुकरणमूलकः शब्दः एकोऽपि नास्ति। उत्तरामेरिकादेशे प्रचलितायाम् अथवस्कनभाषायामेतादृशः शब्दो नास्त्येव।

इ) रवानुकरणमूलकश्चेत् शब्दः सर्वासु भाषासु तादृशशब्दस्य रूपं समानमेव स्यात्। किन्तु तथा न भवति। संस्कृतभाषागतस्य निर्झरशब्दस्य बङ्गभाषाया झर्णा इति , आङ्गलभाषायां 'फाउन्टेन् पेन्' इति, जार्मानभाषायां 'स्ट्रोम्' इति प्रतिरूपाणि भवन्ति।

ई) मानवाः प्राणिषु श्रेष्ठाः। चिन्तनशीलानां तेषां भाषाव्यवहारे सर्वत्र अनुकरणप्रवृत्तिः समर्थयितुं न शक्यते। परिहासपरायणेन म्याक्स्मूलारेण अस्य मतवादस्य हेयतां प्रतिपादयितुं 'The Bow wow Theory' इत्येवं कृतं नामकरणम्। उक्तं च तेन - 'This theory goes very smoothly so long, as it deals with cockling hens or quacking ducks but round that poultry yard there is a deal wall behind which language really begins'।

यद्यपि यास्काचार्येण शब्दानुकृतिवादः स्वीकृतः तथापि तद्वादम् औपमन्यवो नाम आचार्यो नाङ्गीकरोति। तेन काकादिशब्दप्रयोगव्यापारेऽपि शब्दनिरुक्तिः प्रदर्शिता। तस्मान्निरुक्तग्रन्थे उक्तं - 'न शब्दानुकृतिर्विद्यत इत्यौपमन्यवः। काकोऽपकालयितव्यो भवति' इति (नि.३.१८)। वादोऽयं सर्वथा न हेयः। शब्दानुकृतिमूलकत्वं स्वल्पानाम् अपि शब्दानां स्वीकार्यमेव।

**ख) भावाभिव्यक्तिवादः (The Pooh-pooh Theory/ The Interjectional Theory)** – आविर्भावकाले मानवाः भाषाविहीना जाताः। तदानीमपि तेषां हर्षशोकविस्मयभयघृणाक्रोधादयः भावाः आसन्। एषां भावानाम् अभिव्यक्तये तैः केचन भावाभिव्यक्तिसूचकाः शब्दाः कण्ठतः उदीरिताः। वस्तुतः भावानां तीव्रतादशायां स्वत एव केचन शब्दाः उद्गीर्णा भवन्ति। बङ्गभाषायां हर्षसूचकाः शब्दाः अहो, वाः, इत्यादयः, शोकव्यञ्जकाः शब्दाः ओः, हाय् इत्यादयः, विस्मयबोधकाः वाः, अयाँ, क्रोधद्योतकाः आः, धेट् इत्यादयः, घृणाप्रकाशकाः छिः, छि-छि, छ्या-छ्या इत्यादयः श्रूयन्ते। आङ्गलभाषायामपि मनोभावसूचकाः phoo, pish, fig, oh – इत्यादयः, विस्मये oh – इत्यादयः शब्दा निर्गच्छन्ति। अत एवानुमीयते यत् भाषाव्यवहारस्य प्राथमिके पर्वणि मनोभावान् प्रकटयितुम् अवश्यमेव एतादृशाः शब्दाः निर्गताः। तदनन्तरं ते एव शब्दाः ध्वनयो वा भाषायां गृहीताः। एवं भाषास्थितानां केषाञ्चनशब्दानां व्यवहार उत्पत्तिर्वा व्याख्याता।

निरुक्तग्रन्थेऽपि प्रथमाध्याये पञ्चमे खण्डे अह, आ, इम्, इङ्, उ, उम्, आम्, किं, खलु - इत्यादयः संस्कृतगताः शब्दाः मनोभावद्योतकत्वेन परिगणिताः।

**समीक्षा** - अयमेव वादः सर्वथा न ग्राह्यः। भाषातत्त्वविद्भिः अत्र बहवो दोषा उद्भाविताः -

अ) भावाभिव्यञ्जकाः शब्दाः सर्वासु भाषासु समानाकारा न भवन्ति कष्टप्रकटनाय जार्मानभाषाभाषी Au (आउ) इति, फ्रान्सदेशीयो जनः Ahi (आहि) इति, आङ्गलभाषाभाषी oh (ओः) इति, बङ्गदेशीयः उः इति चोच्चारयति।

आ) हर्षशोकादिद्योतकानां शब्दानाम् उत्पत्तिप्रकारः कथञ्चिद् व्याख्यातः किन्तु सामान्यभाववाचकानां शब्दानां सहस्राणां न कर्तुं शक्यतेऽनेन वादेन।

इ) चिन्तनशीलानां मानवानां कृते तीव्रमनोभावाभिव्यञ्जकाः शब्दाः स्वत एव निर्गताः , सर्वदा नाभिप्रेता भवन्ति। चिन्तनपूर्वक एव भाषाव्यवहारो जायते।

ई) यदि कदाचित् मनोभावानामर्थादीनाम् आत्यन्तिकी तीव्रता स्यात् तदा वाग्व्यवहारस्य स्थगनं दृश्यते। केवलं तदा अव्यक्ताः शब्दाः उच्चार्यन्ते। ते तु न बोधपूर्वकं व्यवह्रियन्ते। अत एव तत्र वाच्यवाचकसम्बन्धकल्पना न समीचीना भवति।

उ) वेन्फि (Benfey) – महोदयेनापि प्रत्याख्यातोऽयं वादः। तेनोक्तम् - 'The interjection is the negation of language, for interjections are employed only when one either cannot or will not speak.'

यद्यपि वादोऽयं न दोषमुक्तस्तथापि स्वल्पानामपि शब्दानां केषाञ्चित् उत्पत्तिप्रकारव्याख्यात इत्यतः वादोऽयं न त्याज्यः।

**ग) अनुरणनवादः (The Ding-dong Theory)** – एवंविधस्य मतवादस्य सूचना प्लेटोमहोदयेन कृता। ततः पश्चात् ऊनविंशशताब्द्यां हेसमदोह्येन प्लेटोनिर्देशम् अनुसृत्य प्रचारितश्च। एतद्वादानुसारेण अर्थेन सह शब्दस्य रहस्यमस्ति स्वाभाविकः सम्बन्धः अस्ति। अस्मिन् संसारे बहवः पदार्था एतादृशाः सन्ति तेषामुपरि द्रव्यान्तरेणाघाताद् विभिन्नः शब्दः उत्थितः भवति। यदि काष्ठकण्डेन आघातः क्रियते तर्हि कश्चन शब्दः श्रूयते, यदि ताम्रखण्डेन तदा ततोऽपि अपरः कश्चित् शब्दः जायते, किन्तु काष्ठखण्डजातो शब्दः ताम्रखण्डशब्दात् पृथक्तया श्रुतिगोचरो भवति। अनेन हेतुना अदृष्टस्य कस्यचित् वस्तुनः यत् शब्दः श्रूयते तेनैव तद् वस्तु अभिज्ञायते अयमेव शब्दः अनुरणनमिति। सृष्टिकाले मानवाः वाग् -रहिता आसन् तदा ते वस्तुगतम्

अनुरणनम् अनुभूय तद्वस्तुबोधनाय तदनुरणनात्मकं शब्दं व्यवहरन्ति स्म। यथा, नद् नद् इति शब्दस्य जलप्रवाहस्य नदीति नाम कृतम्। पतनशब्दं श्रुत्वा वृक्षपल्लवस्य पत्रमिति नाम कृतम्। एवं जडवस्तूनां नामकरणम् अनुरणनानुसारं सञ्जातम्। बङ्गभाषायां भट्भटि इति शब्देन जलयानम्, पटका इति शब्देन स्फोटकश्चावगम्यते। अनुरणनध्वनिम् अनुकृत्य अपरेऽपि केचन शब्दाः परिगृहीताः। यथा वङ्गभाषायां टुँ-टाङ्, आङ्गलभाषायां डिङ्डङ्, murmur, thunder, zigzag इत्यादयः, संस्कृतभाषायां दुन्दुभ्यादयः।

भगवता यास्काचार्येण अनुरणनवादः अनुकरणवादत्वेन संसूचितः। तथाहि सूत्राणि - दुन्दुभिरिति शब्दानुकरणं - चिश्चा क्रिणोति शब्दानुकरणं वा यच्छति रापो भवन्ति शब्दकारिण्यः इति।

**समीक्षा** -

अ) आहरणजातध्वनेः सर्वत्र श्रुतिसाम्येऽपि अनुरणात्मकस्य शब्दस्य श्रुतिसाम्यं न भवति। घण्टाध्वनिं श्रुत्वा आङ्गलभाषायां डिङ्डङ् इति शब्दो व्यवह्रियते। बङ्गभाषायां तु ढङ्-ढङ् इति शब्दः प्रयुज्यते।

आ) यद्यपि केचन शब्दाः अनुरणनमूलका भवितमर्हन्ति तथापि ते अल्पीयांस एव।

अत एव अयमपि वादः सर्वथा न ग्राह्यः। तथापि भाषोत्पत्तिविषये वादस्यास्य किञ्चिद् गुरुत्वमस्ति एव।

**घ) श्रमध्वनिवादः (The Yo-he-ho Theory)**

श्रमसाध्यानि कर्माणि कानिचन सन्ति। यदा कश्चिद् एवंविधेषु कर्मसु प्रवृत्तो भवति तदा तस्य श्वासक्रिया विवर्धिता भवति। स्वरयन्त्रमध्ये स्वरतन्त्रिद्वयस्य आकुञ्चनप्रसारणक्रियापि वर्धते। परिणामरूपेण स्वरयन्त्रतः अनायासेन कश्चिद् ध्वनिः निर्गच्छति। अस्य ध्वनेः श्रमजन्यत्वात् श्रमध्वनिरित्याख्या भवति। स्वाभाविकोऽयं ध्वनिः श्रमजन्यस्य कष्टस्य लाघवं करोति यथा रजकः वस्त्रधावनकाले यत्र वस्त्रमुत्तोल्य पातयति तदा तस्य कण्ठतः च्छ्यो च्छ्यो इति शब्दः निर्गच्छति , यदि गुरुभारं किञ्चिद् वस्तु अपसार्यते तर्हि हेंय्यो हेंय्यो इति शब्दः उच्चार्यते। एवं बङ्गभाषायां हेंया हेंया , हुँ-हुँ इत्यादयः शब्दाः श्रमपरिहरणमूलकाः व्यवह्रियन्ते। आङ्गलभाषायां yo-he-ho, heave-e-hov – इत्यादयः व्यवह्रियन्ते। एवं शब्दानां केषाञ्चिद् प्रयोगो भवति भाषायाम्। अत एव भाषोत्पत्तिविषयकः श्रमध्वनिवादः Roine -महोदयेन प्रचारितः।

**समीक्षा** -

अ) वादोऽयं न समर्थनयोग्यो भवति। श्रमध्वनयः निरर्थका एव। मानवास्तु अर्थबोधकान् शब्दान् व्यवहरन्ति।

आ) भाषायाः उेत्पत्तौ अर्थविहीनानां शब्दानां नास्ति कोऽपि उपयोगः। अतः वादोऽयं गुरुत्वहीनः।

## ३. धातुमूलकतावादः/ धातुवादः (The Root Theory)

पृथिव्यामाविर्भावकाले मानवाः अव्यक्तशब्दकारिण एव आसन्। तैस्तु उच्चार्यमाणाः शब्दाः सुखदुःखादिभावानां प्रकाशनाय कण्ठतः स्वत एव उत्सारिता अभवन्। आदौ ते परिपूर्णभावानां प्रकाशका जाताः। अतस्ते वाक्यार्थबोधकत्वेन प्रयुक्ता आसन्। ततस्ते क्रियामात्रबोधकाः सम्भूताः। इमे शब्दाः परवर्तिनि काले धातुरूपेण कीर्तिताः सञ्जाताः। तेभ्य एव धातुभ्यः बहवः शब्दाः

अर्थविशेषबोधकाः अभवन्। तेषामेव व्यवहारो भाषायां जायते। भाषाया उत्पत्तिविषये धातुमूलकतावादस्य अयमेव आशयः। उदाहरणरूपेण √*bher (>सं bhr) इति शब्दं ग्रहीतुं शक्यते। अयं शब्दः भारोपीयभाषायां धातुत्वेन अङ्गीक्रियते। जार्मानभाषावर्गे अस्य रूपान्तरं संघटितम्। तच्च रूपं ber-an इत्येवंरूपेण परिकल्पितम्। तत एव धात्वात्मकशब्दात् आङ्गलभाषायां bear, burden, bier, berrow, barley, beer, burn, bairn, birth – इत्यादयः शब्दाः लभ्यन्ते। पुनश्च √*bher – इत्यस्य रूपान्तरं लातिनभाषायां fer-o इति जातम्। ततश्च धात्वात्मकशब्दात् आङ्गलभाषायां far (=barley), farina (barley flour), fertile, reference, deference, conference, difference, inference – इत्यादयः शब्दाः सिद्धाः। एवमाङ्गलभाषायां सार्धद्विलक्षसंख्यकानां शब्दानां मूलत्वेन धातुविशेषाः परिगणिताः। अत्र आर्यधातूनां संख्या चतुःशती इति मन्यते। अस्यास्वपि भाषासु ईदृश्येव स्थितर्लक्ष्यते। तत्र केचन धातवः , बहवश्च धातुमूलाः शब्दाः परिकल्पिताः।

संस्कृतभाषायाम् एतादृश्येव स्थितिर्लक्ष्यते। √ kr̥ (कृ) इति शब्दो धातुत्वेन अभिमतः। अस्माच्च धातोः kr̥tam (कृतम्), kartavyam(कर्तव्यम्), kāryam (कार्यम्), karaṇīyam (करणीयम्) इत्यादयः बहवः शब्दाः निष्पद्यन्ते। एते च शब्दाः कृत्प्रत्ययान्तत्वेन परिगृह्यन्ते। अत एव कृत्प्रत्ययान्ता शब्दाः सर्वे एव धातुमूलका भवन्ति। महर्षिणा पाणिनिना अष्टशतीसंख्यका धातवः उल्लिखिताः। न केवलं कृत्प्रत्ययान्ताः शब्दाः धातुनिष्पन्नाः , अपि तु नामान्यपि निरुक्तशास्त्रकृद्भिः शाकटायनादिभिः धातुजत्वेन परिगृह्यन्ते। अत एवोक्तं यास्केन 'तत्र नामान्याख्यातजानि इति शाकटायनो नैरुक्तसमयश्च' इति। 'उणादयो बहुलम्' इति सूत्रेण उणादिप्रत्यया अभ्युपेताः। उणादिप्रत्ययान्ताश्च शब्दा धातुमूलका भवन्ति।

इत्थं विविधासु भाषासु धातूनां सद्भावपरिकल्पनात् धातुवादस्य प्राधान्यं स्वीकरणीयमेव। धातुवादविषये प्रणिधानयोग्या उक्तिरियं दृश्यते - "In order to get some idea of this theory we need a picture before our mind of an infantile stage of language when men used to give expression to their thoughts through the mediam of short sounds resulting from internal immotions. Each of those sounds was expressive as a sentence and ordinarily denoted some sort of action." - P. C. Chakraborty, Linguistic Speculations of the Hindus, p.112.

समीक्षा -

अ) भारोपीयगोष्ठीभुक्तासु भाषासु इव अन्यास्वपि योगात्मिकासु (Organoic/non-isolating) भाषासु धातूनां सद्भावपरिकल्पना संगच्छते। किन्तु अस्मिन् संसारे अयोगात्मिका अपि भाषाः सन्ति। चीनीया भाषा अयोगात्मिका भाषा (inorganic/isolating/positional language)। अत्र धातूनां प्रकृतिप्रत्ययादीनां चास्तित्वं नास्ति। भाषेयम् आवस्थानिकी भाषा। वाक्यमध्ये शब्दानामवस्थानभेदेन वाक्यार्थभेदः सम्पद्यते। यथा चीनीयभाषायम् -

नि त ङ्गो - त्वं प्रहरसि माम्।

ङ्गो त नि - अहं प्रहरामि त्वाम्।

सुदानदेशीया भाषा, मालयदेशीया भाषा, श्यामदेशीया भाषा च अयोगात्मिका भाषा। एतादृशीसु अयोगात्मिकासु सर्वास्वेव भाषासु धातूनामनस्तित्वं लक्ष्यते। एतासां भाषाणाम् उत्पत्तिप्रकारव्याख्याने धातुमूलकतावादः सर्वथा अनुपयोगी।

आ) योगात्मिकासु भाषास्वपि बहवः शब्दाः सन्ति येषां मलूं न कोऽपि धातुः। संस्कृतभाषायामेव डित्थ -डवित्थादयः शब्दाः सन्ति येषां धातुमूलकत्वं न सम्भवति।

इ) आदिमानवैः संक्षिप्ततमाः शब्दाः उच्चारिता इति कल्पना प्रामाणाभावात् निराधारा अवैज्ञानिकी च।

अतः आतुवादोऽपि भाषोत्पत्तिप्रकारव्याख्याने न पूर्णतया समर्थः। तथापि वादोऽयं न सर्वथा हेयः। योगात्मिकानां भाषाणां विषये किञ्चिद् गुरुत्वम् अवश्यमेव स्वीकार्यम्।

**उपसंहारः** -

अन्येऽपि केचन मतवादाः भाषोत्पत्तिविषये सन्ति। ते च संकेतवादः , सङ्गीतवादः, प्रतीकवादः, विकाशवादः इत्येवमादयः भवन्ति। प्रायः सर्व इमे वादाः प्राक्तनैः भाषातत्त्वविद्भिः ग्रिम् -हाम्बोल्ट-इयेसपार्सन्-म्याक्समूलार-प्रमुखैः समुद्घोषिताः समाद्रिता वा। किन्तु इदानीन्तनैः भाषाविज्ञानशास्त्रिभिः भाषोत्पत्तिविषयमेव न तथा गृह्यते। तेषां मते कुत्रापि भाषाया आदिमतमं रूपं न लब्धम्। अत एव प्रत्यक्षप्रमाणाभावात् न कोऽपि वादः समर्थनयोग्यो भवति। यद्ययं भाषोत्पत्तिवादः आलोचनीयः स्यात् तर्हि दर्शने मानवविज्ञाने समाजविज्ञाने तदालोचनं विधेयम्। ये तु मतवादाः उपरि विचारिताः तेषाम् उपयोगिता विषयपरिचयार्था एवेति दिक्।

------

## भाषाणां वर्गीकरणम्

पृथिव्यां बहुसंख्यकाः भाषाः सन्ति। वस्तुतः भाषासंख्यायाः निर्धारणं दुःखसाध्यमेव।

प्रथमतः, सुमेरीय-एत्रुस्कान-एलामीय-मिटान्नीप्रभृतयः इव काश्चन भाषा विलुप्तिं गताः।

द्वितीयतः, यासां भाषाविशेषाणां साहित्यिकं रूपं नास्ति तासां स्वरूपं पार्थक्यं च यथार्थतः दुर्निर्णेयम्।

तृतीयतः, अरण्यस्था भाषाः पार्वत्यप्रदेशस्था भाषाश्च स्वरूपतः न निरूपिताः।

चतुर्थतः, न कोऽपि मनुष्योऽस्ति यः सर्वा भाषा विज्ञातुं समर्थः भवति। तथापि गणकानां केषाञ्चन मते भाषासंख्या २७९६ इत्येवं रूपेण निर्दिष्टा। भाषासंख्यानिरूपणस्य दुःसाध्यत्वेऽपि सामान्यविशेषतया भाषास्वरूपनिरुपणार्थं भाषाणां वर्गीकरणम् आवश्यकम्।

भाषाणां वर्गीकरणम् अनेकधा भवितुमर्हति। न्यूनतया अष्टधा तत् क्रियते। यथा -

१. कालक्रमानुगतं वर्गीकरणम् - कालक्रममाधारीकृत्य प्रागैतिहासिकी भाषा आधुनिकी भाषा इत्येवं श्रेणीविभाजनं कृतम्।

२. धर्मानुगतं वर्गीकरणम् - अस्मिन् विश्वे बहवो धर्माः सन्ति। धर्ममाधारीकृत्य हिन्दुभाषा, ख्रीष्टानी भाषा, मुसलमानी भाषा इत्येवं श्रेणीविभागः कृतः।

३. जात्यानुसारि वर्गीकरणम् - मनुष्याणां जातिमभिलक्ष्य आङ्गलजातीयानां भाषा आङ्गलभाषा। बङ्गीयानां भाषा बङ्गभाषा इत्येवं श्रेणिविभाजनं कृतम्।

४. देशानामानुसारि वर्गीकरणम् - भारतादयः बहवो देशाः सन्ति। देशनामानि अवलम्ब्य भषाणां वर्गीकरणं कृतम्। यथा - जीनदेशीया भाषा चीनीया भाषा, भारतवर्षस्य भाषाः भारतीयाः भाषाः इत्यादयः।

५. महादेशनामानुसारि वर्गीकरणम् - महादेशा अपि विभिन्नाः सन्ति। तेषां नामानि संगृह्य भाषाणां वर्गीकरणं कृतम्। यथा- युरोपमहादेशीयाः भाषाः युरोपीया भाषाः, आफ्रिकामहादेशीया भाषा आफ्रिकीया भाषा इत्यादयः।

६. प्रभावानुगतं वर्गीकरणम् - प्रायः एकस्यां भाषायामितरासां भाषाणां प्रभावः परिलक्ष्यते। एतादृशं प्रभावमाधारीकृत्य भाषाणां वर्गीकरणं जातम्। यथा - संस्कृतप्रभाविताः भाषाः, पारसिकीप्रभाविताः भाषाः इत्यादयः।

७. रूपतत्त्वानुगतं वर्गीकरणम् - भाषाणामाकृतयः नैकरूपाः कुत्रचिद् भाषा आवस्थानिकी भवति। कुत्रचिच्च विभक्तियुक्ता भाषा दृश्यते। अत एव वाक्यगतं वैशिष्ट्यं संसूच्य भाषाणां वर्गीकरणं कृतम्। यथा - चिनीया भाषा, संस्कृतभाषा इत्यादयः।

८. वंशानुगतं वर्गीकरणम् - यदि काचिद् भाषा नैरन्तर्येण व्यवह्रियते तर्हि कालक्रमेण तस्याः भाषायाः विविधाः भाषाः उत्पद्यन्ते। उत्पन्ना भाषा तदा मूलभाषायाः वंशान्तर्भूता भवन्ति। तस्मात् मूलभाषायाः नामानुसारेण वंशस्य नामकरणं भवति। वंशान्तर्गता भाषा तद्वंशानुसारेण अभिधीयन्ते। यथा - इन्दो-युरोपीया भाषाः, सेमियो-हामिया भाषा, द्राविडीया भाषा इत्यादयः।

एवम् इतराण्यपि वर्गीकरणानि सम्भवन्ति। यद्यपि वर्गीकरणं बहुधा भवन्ति , तथापि रूपतत्त्वानुगतं वर्गीकरणं वंशानुगतं वर्गीकरणं च भाषाविद्याचर्चायाम् अतीवगुरुत्वपूर्णा भवति। अत एव, अन्तिमं वर्गीकरणद्वयं वैशद्येनालोच्यते --

**१. रूपतत्त्वानुगतं वर्गीकरणम् (Morphological classification)** – भाषायां वाक्यमेव प्रधानम्। वाक्यं तु पदसमूहात्मकम्। वाक्यरचनाप्रकारस्य पदरचनाप्रकारस्य वा वैशिष्ट्यमाधारीकृत्य यद् वर्गीकरणं क्रियते तदेव रूपतत्त्वानुगतं वर्गीकरणम्। Morphology-इत्यस्य रूपतत्त्वमित्यर्थः। अत एव शब्दरूपतत्त्वं धातुरूपतत्त्वं चाश्रित्य ईदृशं वर्गीकरणं जायते। एवम्प्रकारस्य च वर्गीकरणस्य Morphological classification इति आख्या भवति। पुनश्च वाक्यरचनामूलकतया Syntactical classification आकृतिमूलकतया च Typological classification – इत्यपि अभिधाद्वयं भवति।

रूपतत्त्वानुगतम् आकृतिमूलकं वा वर्गीकरणमनुसृत्य भाषाणाम् उपविभागः प्रविभागप्रकारश्च वर्गीकरणसारणीरचनया प्रदर्श्यते।

भाषाणां रूपतत्त्वानुगतवर्गीकरणसारणी -

भाषा - १. अयोगात्मिका (चीनीया, सुदानी, तिब्बती... ) २. योगात्मिका

२. योगात्मिका - क. अश्लिष्टा ख. श्लिष्टा ग. प्रश्लिष्टा

क. अश्लिष्टा -- अ. मध्ययोगात्मिका आ.पूर्वयोगात्मिका (काफीरी) इ. अन्तयोगात्मिका (द्राविडा) ई. पूर्वान्तयोगात्मिका (मालयी, तुर्की..), उ. आंशिकयोगात्मिका (पलिनेशीया, हाओयाइया...)

ख. श्लिष्टा -- अ. अन्तर्मुखी आ. बहिर्मुखी

अ. अन्तर्मुखी - i) संश्लेषात्मिका (आरवीया...) ii) विश्लेषात्मिका (हिब्रु...)

आ. बहिर्मुखी -- i) संश्लेषात्मिका (संस्कृतम्...) ii) विश्लेषात्मिका (हिन्दी, बङ्गीया)

ग. प्रश्लिष्टा -- अ. पूर्णा (ग्रीणल्याण्डिया) आ. आंशिकी (वास्क)

## भाषाणां रूपतत्त्वानुगतं वर्गीकरणम्

भाषाणां रूपतत्त्वानुगतवर्गीकरणानुसारेण भाषा मुख्यतया द्विविधा भवति -- १. अयोगात्मिका २. योगात्मिका च।

**१. अयोगात्मिका भाषा (Isolating/ Inorganic Language)** – यस्यां भाषायां वाक्यघटकीभूतपदानां मध्ये योगः प्रकृतिप्रत्ययादीन् अवलम्ब्य विभक्तिमाश्रित्य वा नास्ति सा एव भाषा अयोगात्मिका भाषा इत्युच्यते। अत्र रूपमूलमेव वर्तते। शब्दादौ शब्दमध्ये शब्दान्ते वा प्रत्ययादियोगेन शब्दाकृतेर्विकारो न भवति। यथा - चीनीयादयो भाषाः। एतादृशीषु भाषासु वाक्यगतानां पदानां सत्ता स्वतन्त्रा भवति। यथा - चीनीयायां भाषायां --

त लइ = स आगच्छति (संस्कृतम्)

त लइ लियाओ = स आगच्छत् (संस्कृतम्)

अत्र लियाओ इति शब्दः क्रियासमाप्तिबोधकः। त लइ -इत्यत्र लइ -इत्यनेन वर्तमानकालिना क्रिया बोध्या। अतीतकालिनक्रियां बोधयितुं लियाओ इति स्वतन्त्रः शब्दः प्रयुज्यते। त लइ लियाओ इति वाक्ये पदत्रयं वर्तते। किन्तु कोऽपि योगो नास्ति। अत एव एतादृशी भाषा असमवायिनी इति कथ्यते। वाक्यमध्यस्थपदानाम् अवस्थानभेदेनापि वाक्यार्थभेदसम्भवात् एतादृशी भाषा आवस्थानिकी (Positional) भाषा इत्युच्यते। चीनीया भाषा तु एकाक्षरी भाषा (monosyllabic language)। अस्यां भाषायामेकं वाक्यमेवं भवति -- वाङ् श्येन् श्येङ् लाइया इति। श्रीमान् वाङ् आगतः इति वाक्यार्थः। वाङ् (नाम कश्चित्), श्येन् शेङ् (श्रीमान्), लाई (आगमनम्), ला (अतीतकालिनक्रियाबोधकः शब्दः)।

अयोगात्मिकानां भाषाणां वैशिष्ट्यानि --

क) वाक्यमध्यस्थितस्य पदक्रमस्य शब्दक्रमस्य वा गुरुत्वम् अवश्यमेवानुभूयते।

ख) वाक्यस्थितशब्दानाम् आकृतिपरिवर्तनं न भवति।

ग) वाक्यगतशब्दानां परस्परं सम्बन्धस्य बोधनार्थं सम्बन्धबोधकस्वतन्त्रः शब्दः प्रयुज्यते।

घ) सम्बन्धसंसूचकस्य निपातशब्दस्य च योगेन शब्दनिर्माणं वाक्यरचना च सम्भवति।

ङ) वाक्यगतशब्दानां विभक्तिविहीनत्वात् प्रकृतिप्रत्ययादिराहित्यात् विशेष्यविशेषणादिभावशून्यत्वाच्च एतादृश्याः भाषायाः व्याकरणं किमपि नास्ति।

च) स्वरभेदेन (tone, सुर) एकस्यैव शब्दस्य अर्थभेदो जायते। यथा व्यवहारिक्यां चिनीयायां भाषायां मा -शब्दस्य चतुर्विधस्वरभेदेन चतुर्विधार्थो भवति। उच्चग्रामे साम्यावस्थायां (High Level Tone) – मा-शब्दः मातृवाचकः उच्चग्रामादुच्चतरग्रामे (High rising tone) मा-शब्दः शनार्थकः। निम्नग्रामादूर्ध्वगमनावस्थायां (Low-rising tone) मा-शब्दः अश्वबोधकः। निम्नग्रामाद् निम्नतरावस्थायां (Low-falling tone) मा-शब्दः तिरस्कारवाची।

अयोगात्मिकासु भाषासु चीनीया भाषा स्थानप्रधाना स्वरप्रधाना च। सुदानीभाषा स्थानप्रधाना , अनामीभाषा स्वरप्रधाना, किन्तु वर्मीभाषा श्यामीभाषा तिब्बतीभाषा च निपातप्रधाना भवति।

**२. योगात्मिका भाषा (Non-isolationg or Organic Language)**

यस्यां भाषायां शब्दस्य नामप्रकृतेः धातुप्रकृतेर्वा योगः सम्पर्कः प्रत्ययेन विभक्त्या वा भवति। सा भाषा योगात्मिका भाषा समवायिनी भाषा इति वा कथ्यते। एतादृश्यां भाषायाम् अर्थतत्त्वस्य सम्बन्धतत्त्वेन सह योगो भवति एव। योगेन च शब्दस्य नामप्रकृतेः धातुप्रकृतेर्वा रूपान्तरं विकृतिर्वा भवति। संस्कृतभाषायां हस्तेन पुस्तकं गृह्णाति इति वाक्ये हस्तेन इति पदं हस्तशब्दात् इनविभक्तेर्योगात् सिध्यति। हस्तेन इति पदं च हस्तशब्दस्यैव विकृतं रूपम्। अस्मिन् संसारे योगात्मिकानां भाषाणामेव बाहुल्यं परिदृश्यते। ग्रीकभाषा, लातिनभाषा, तुर्कीभाषा, आरवीया भाषा इत्यादयोऽपि भाषा योगात्मिका भाषा एव।

योगस्य प्रकृत्यनुसारेण योगात्मिकानां भाषाणां त्रयो भेदाः परिकल्पिताः। यथा --

क) अश्लिष्टा योगात्मिका भाषा (Agglutinating Language) – एतादृशीषु भाषासु प्रत्ययस्यैव प्राधान्यम्। किन्तु प्रकृतीनां प्रत्ययानां च स्वतन्त्रतया बोधो भवति। यता तुर्कीभाषाया -- एव् इ = गृहम् (संस्कृतम्, एकवचने, कर्म)

एव् लेर् इ = गृहान् (बहुवचने कर्म)

ख) श्लिष्टा योगात्मिका भाषाः (Inflexional Language) – एतादृशीषु भाषासु विभक्तेरेव प्राधान्यं , यथा संस्कृतभाषायाम् - रामः अन्नं पचति, अन्नं पचति रामः, पचत्यन्नं रामः इत्येवं वाक्यानि भवितुम् अर्हन्ति। विभक्तिप्रयोगवशेनैव वाक्यस्य एकविध एव अर्थबोधो भवति, विभक्त्या वाक्यगतपदानाम् अन्वयसम्भवात्।

ग) प्रश्लिष्टा योगात्मिका भाषाः (In-corporating Language) – एतादृशीषु भाषासु समासस्यैव प्राधान्यम्। यथा, ग्रीनल्याण्डीयायां भाषायाम् - आउलिसारिआरतोरासुआरपोक् इत्येवं वाक्यम्। स मत्स्यान् संग्रहीतुं धावति इति वाक्यार्थः। एतत्तु वाक्यम् एकपदात्मकम् एव। यदि वाक्यस्यैतस्य विश्लेषणं क्रियते तर्हि विविधानि पदानि लक्ष्यन्ते। यथा - आउलिसार=मत्स्यसंग्रहः, पियारतोर् = एकस्मिन् विषये नियुक्तिः, पिन्नेसुआरपोक् = स धावति।

**१. अश्लिष्टानां योगात्मिकानां भाषाणां भेदाः** -

अश्लिष्टानां योगात्मिकानां भाषाणामेतदेव वैशिष्ट्यं यत् अर्थतत्त्वस्य सम्बन्धतत्त्वेन सह योगः स्पष्टतया अनुभूयते ईदृशीषु भाषासु। योगश्चायं सम्भवति अर्थतत्त्वस्य कुत्रचित् पूर्वभागे कुत्रचित् अन्तभागे कुत्रचित् मध्यभागे , कुत्रचिच्च पूर्वभागे अन्तभागे

च। अतः अश्लिष्टभाषाणां मुख्या भेदाः चत्वार एव – पूर्वयोगात्मिका भाषा , अन्तयोगात्मिका भाषा, मध्ययोगात्मिका भाषा, पूर्वान्तयोगात्मिका भाषा चेति।

क) पूर्वयोगात्मिका भाषा (Prefix Agglutinating Language) – एतादृश्यां भाषायां प्रकृतेरारम्भभागे एव प्रत्ययसदृशशब्दस्यावस्थानं भवति। आफ्रिकामहादेशे वान्तु (ण्टु) -भाषागोष्ठ्या एवमेव वैशिष्ट्यं परिलक्ष्यते। जुलुभाषात एकमुदाहरणम् -

न्तु = नरः

उमु = एकवचनबोधकः शब्दः

कु = निमित्तबोधकः शब्दः

कु उमु न्तु = एकस्मै नराय

ख) अन्तयोगात्मिका भाषा (Suffix Agglutinating Language) – एवंविधायां भाषायां प्रत्ययात्मकं प्रत्ययसदृशशब्दात्मकं वा सम्बन्धतत्त्वं प्रकृतिरूपस्य अर्थतत्त्वस्य अन्तभागे प्रयुज्यते। द्राविडगोष्ठीभुक्तानां भाषाणां सर्वासामेव ईदृशी अवस्था दृश्यते। यथा - कन्नडभाषायां सेवकशब्दस्य रूपाणि

| कारके | एकवचने | बहुवचने |
|---|---|---|
| कर्तरि | सेवक-नु | सेवक-रु |
| कर्मणि | सेवकनन्नु | सेवकरन्नु |
| करणे | सेवकनिंद | सेवकरिंद |

प्रत्ययभागे नकारस्थाने रवर्णग्रहणेन बहुत्वं सूच्यते।

ग) पूर्वान्तयोगात्मिका भाषा (Prefix-suffix Agglutinating Language) – ईदृश्यां भाषायां सम्बन्धतत्त्वम् अर्थतत्त्वस्य पूर्वभागे पश्चाद्भागे च संयुक्तं भवति। यथा फरासीभाषायां निषेधबोधनाय 'न ....पा' इति शब्दद्वयं निषेधस्य पूर्वभागे पश्चाद्भागे च प्रयोज्यते। "दो ने माँ" इति वाक्यस्य "मह्यं किञ्चिद् देहि" इत्यर्थः। किन्तु "न माँ दो ने पा" इति वाक्यस्य ' मह्यं किञ्चिद् मा देहि' इत्यर्थः।

घ) मध्ययोगात्मिका भाषा (Infix Agglutinating Language) – एतादृशी भाषा प्रायः अक्षरद्वयात्मिका भवति। अत एव अक्षरद्वयमध्ये सम्बन्धतत्त्वं विद्यते। यथा - साँओतालिभाषायां 'मं झि' इति शब्दः ग्रामप्रधानवाचकः। 'प' इति च बहुत्वबोधकः। अतः 'मं प झि' इति शब्देन ग्रामप्रधाना इति बोध्यते।

ङ) आंशिकयोगात्मिका भाषा (Partially Agglutinating Language) – पलिनेशिओ-भाषागोष्ठीभुक्ता भाषा आंशिकयोगात्मिका भाषा इति कथ्यन्ते। आदौ तासां योगात्मकत्वमासीत्। किन्तु मालयगोष्ठीभुक्तभाषासंसर्गात् इदानीं योगात्मकत्वं क्षुण्णं भवति।

**२. श्लिष्टानां योगात्मिकानां स्वरूपं भेदद्वयं च (Nature and divisions of Inflecting Language)** – श्लिष्टासु योगात्मिकासु भाषासु सम्बन्धतत्त्वेन सह अर्थतत्त्वस्य अवश्यमेव योगो भवति , किन्तु संयोगवशात् अर्थतत्त्वमध्ये किञ्चित् परिवर्तनं जायते। अर्थात् अर्थतत्त्वमध्ये ध्वनिविकारो भवति। तथापि सम्बन्धतत्त्वांशस्य झटित्येव अवबोधो भवति। यथा आरवीयायां भाषायां लिखनार्थकात् कतब-धातोः किताब् (लिखितं पुस्तकम्), कुतुब (लिखितानि पुस्तकानि), कातिब (लेखकः), मकतब (विद्यालयः, यत्र लिखनम् अध्याप्यते ), मकातिब (विद्यालयाः), कुतुबा (लेखः), मकतुब (लिखितम्), मकतुबात (लिखितानि) इत्यादयः शब्दाः निष्पद्यन्ते। यथा वा संस्कृतभाषायां - कृधातोः करणम्, कर्तव्यम्, कार्यम्, करणीयम्, कृत्यम् इत्यादीनि सिध्यन्ति।

भारोपीयाः भाषाः सेमीयाभाषाः हामीयाभाषाश्च सर्वाः श्लिष्टा योगात्मिका भाषाः। अत एव संस्कृत -ग्रीक-लातिन-रुशीय-आवेस्तीय-आङ्गल-हिन्दी-बङ्गीयादयः भाषाः अस्मिन् वर्गे अन्तर्भूता भवन्ति।

श्लिष्टानां योगात्मिकानां भाषाणां भेदद्वयं दृश्यते। काश्चन तादृश्यः भाषाः अन्तर्मुख्यः (Internally Inflecting), काश्चन च बहिर्मुख्यः (Externally Inflecting)। अन्तर्मुखीणां श्लिष्टानां वैशिष्ट्यमेवमेव यत् आसु भाषासु शब्दनिर्माणव्यापारे अर्थतत्त्वमध्ये एव सम्बन्धतत्त्वं संयुक्तं भवति। आरवीया भाषा एतादृशीनां भाषाणां प्रतिनिधिरूपा। सेमीयगोष्ठीभुक्ता हामीयगोष्ठीभुक्ताश्च अपरा भाषा अन्तर्मुख्यः भाषाः। बहिर्मुखीणां श्लिष्टानां वैशिष्ट्यं तु किञ्चिद् विपरीतम् , अत्र अर्थतत्त्वस्य शेषे सम्बन्धतत्त्वं संयुक्तं भवति। संस्कृतभाषा अत्र प्रतिनिधिस्थानीया। भारोपीयगोष्ठीभुक्ता ग्रीक -लातिन-आवेस्तीय-आङ्गल-हिन्दी-बङ्गीयादयो भाषाः बहिर्मुख्यः श्लिष्टाः भाषाः।

**३. प्रश्लिष्टानां योगात्मिकानां भाषाणां स्वरूपं भेदद्वयं च (Incorporating Language)** – प्रश्लिष्टासु योगात्मिकासु भाषासु अर्थतत्त्वेन सह सम्बन्धतत्त्वस्य अवश्यमेव निविडतमो योगो भवति। योगे सति अर्थतत्त्वभागात् सम्बन्धतत्त्वभागस्य पृथक्करणं न सम्भवति, नापि च पृथक्तया तयोर्बोधो भवति , वस्तुतः वाक्यान्तर्गतानां शब्दानां समन्वयो भवति। समन्वयकाले शब्दानाम् अंशविशेषाः मिलिताः सन्तः वाक्यात्मः शब्दो वा शब्दात्मकं वाक्यं वा भवति। अर्थात् एकमेव वाक्यम् एक एव शब्दो भवति। यथा- ग्रीन्ल्याण्डीयादयो भाषाः।

एतादृश्याः भाषाया भेदद्वयं वर्तते काश्चन भाषाः पूर्णतया प्रश्लिष्टा (Fully Incorporating), काश्चन च अंशतः प्रश्लिष्टा (Partly Incorporation)। पूर्णतया प्रश्लिष्टायां भाषायां विशेष्यविशेषणादीनि सर्वाणि पदानि मिलितानि भवन्ति। दक्षिणस्याः आमेरिकायाः चेरोकीभाषा पूर्णतया प्रश्लिष्टा भाषा। अत्रोदाहरणं यथा -

नातेन= नय

अमखोल = नौः

निन = वयम्।

एते त्रयः शब्दाः यदा मिलिताः भवन्ति तदा शब्दांशविशेषा अपगता भवन्ति। वाक्यात्मकः एकः एव शब्दः समुत्पद्यते च। स च वाक्यात्मकः शब्दः एवंविधो भवति - 'नाधोलिनिन' इति। अस्य वाक्यात्मकस्य शब्दस्य शब्दात्मकस्य वाक्यस्य वा अर्थो भवति -'मत्समीपं नावं नय' इति।

अंशतः प्रश्लिष्टायां भाषायां सर्वनामपदं क्रियापदं च मिलितं भवति, न तु सर्वाण्येव पदानि। यथा - स्पेनदेशे पिरेनीज-पर्वतस्य पश्चिमभागे व्यवहितायां वास्क्-भाषायां -

१. हकार्त = अहं नयानि त्वाम्

२. नकार्सु = त्वं नयसि माम्

३. दकार्किओत् = अहं नयामि इदं तत्सकाशम्।

## वर्गीकरणयोग्या भाषा

पृथिव्यां सन्ति काश्चन भाषा यासां स्वरूपं पूर्वोक्तप्रकारेण निर्णेतुं न शक्यते। अत एव तासां रूपतत्त्वानुगतं वर्गीकरणं न सम्भवति। जापनीप्रभृतयो भाषाः एवंविधा भवन्ति।

## भाषाणां वंशानुगतं वर्गीकरणम् -

पृथिव्यामस्यां भाषाणां बहुविधत्वेऽपि कासुचित् कासुचित् भाषासु न केवलं रूपतत्त्वानुगतं साम्यं दृश्यते , अपि तु ध्वनिसाम्यं, शब्दसाम्यं, वाक्यरचनासाम्यम् अर्थसाम्यं व्याकरणप्रक्रियासाम्यं स्थानिकसामीप्यं च परिलक्ष्यते। यासां भाषाणां मध्ये एतादृशानि साम्यानि अनुभूयन्ते ताः सर्वाः एकस्मिन् भाषावंशे अन्तर्भूता भवन्ति। भाषाविशेषेषु उक्तानि साम्यानि तदैव सम्भवन्ति यदा मूलीभूतायाः कस्याश्चिद् भाषायाः तासामुद्भवो भवति। अत एव मूलीभूतायाः भाषायाः नामानुसारेण वंशनाम कल्प्यते। संस्कृतभाषा, प्राचीना ग्रीकभाषा, लातिनभाषा, प्राचीना जार्मानभाषा, प्राचीना स्लावीयाभाषा, प्राचीना केल्तिकभाषा, आवेस्तीयभाषा, प्राचीना पारसिकाभाषा इत्येतासां मध्ये उक्तरूपाणि सादृश्यानि निर्णीतानि। तानि विशेषतो यथा --

१. एतासु भाषासु स्वरध्वनीनां ह्रस्वदीर्घभेदौ दृश्येते। म-ध्वनिः, र-ध्वनिः सर्वत्र अपरिवर्तितस्तिष्ठति।

२. समार्थकशब्दसादृश्यमेवं भवति -

| संस्कृत | ग्रीक | लातिन | गथिक | आङ्गल |
|---|---|---|---|---|
| pitā | patēr | pater | fadar | father |
| mātā | mātēr | māter | x | mother |

३. अत्र कर्तृकर्मादीनि पदानि मिलितानि सन्ति वाक्यानि भवन्ति।

४. उक्तासु भाषासु लिङ्गभेदः, पुरुषभेदश्च वर्तते।

५. प्रायः शब्दाः धातुमूलकाः भवन्ति।

६. शब्दनिर्माणव्यापारे स्वरक्रमस्य (अपश्रुतेः) गुणवृद्ध्यादिरूपस्य गुरुत्वमस्ति।

७. स्वराघातस्य श्वासाघातस्य वा व्यापारो विद्यते। (Accent)

८. स्थानिकसान्निध्यञ्च परस्परं वर्तते।

इत्थं विविधानां साम्यानां सद्भावात् स्थिरीक्रियते यत् उक्ता भाषा एकस्मिन्नेव भाषावंशे अन्तर्भवन्ति। अत्र भाषावंशस्य आख्या भवति इन्दो-युरोपीय-भाषावंशः भारोपीयभाषावंशो वेति।

एवं संमीय-हामीयदयः अन्येऽपि भाषावंशाः सम्भवन्ति।

**भाषाणां वंशानुगतवर्गीकरणायोग्यता** -

मिटान्निभाषा, एत्रुस्कानभाषा इत्यादीनां विलोपात् तासां वंशनिरूपणं न सम्भवति।

# पृथिवीस्थाः भाषावंशाः

पृथिवीस्थितानां भाषावंशानां संख्याविषये मतभेदो वर्तते। हुम्बोल्ट -महोदयस्य मतानुसारेण पृथिव्यां त्रयोदशसंख्यकाः भाषावंशाः विद्यन्ते। किन्तु म्याक्समूलरमहोदयस्य मतानुसारेण प्रायः शतसंख्यका भाषावंशाः सम्भवन्ति। तथापि निर्विवादं मुख्या भाषावंशा विंशतिसंख्यका भवितुमर्हन्ति। तेषां परिगणनं निम्नोक्तप्रकारं -

**क) इउरोप-एशियाभूखण्डे**

१. इन्दो-युरोपीयभाषावंशः/ भारोपीयभाषावंशो वा। (Indo-European family of languages)

२. सेमीय-हामीयभाषावंशः (Semitic-Hamitic family of languages)

३. द्राविडीयभाषावंशः ( Dravidian family of languages)

४. वुरुशास्कीयभाषावंशः (Burusaski family of languages)

५. ककेशीयभाषावंशः (Caucasian family of languages)

६. इउरालीयभाषावंशः (Uralic family of languages)

७. चीनीय-तिब्बतीयभाषावंशः (Sino-Tibetan family of languages)

८. जापानीयकोरीयभाषावंशः (Japanise Korian family of languages)

९. हाइपारवोरीयभाषावंशः (Hyparborian family of languages)

१०. वास्कीयभाषावंशः (Basque family of languages).

**ख) प्रशान्तमहासागरीयभूखण्डे** -

११. मालय-पलिनेशीय-भाषावंशः (Malay-Polinesian family of languages)

१२. पापुइयभाषावंशः ( Papuan family of languages)

१३. अष्ट्रेलियभाषावंशः (Australian family of languages)

१४. अष्ट्रो-एशीय-भाषावंशः (Austro-Asiatic family of languages)

**ग) आफ्रिकाभूखण्डे** -

१५. सुदान-गिनीयभाषावंशः (Sudan-Guinean family of languages)

१६. वान्टुभाषावंशः (Bantu family of languages)

१७. वुशमान-हटेण्टटभाषावंशः (Bushman-Hottentot family of languages)

**घ) आमेरिकाभूखण्डे -**

१८. आमेरिकीय-भाषावंशः (American family of languages)

१९. मध्य-आमेरिकीय-भाषावंशः (Central-American family of languages)

२०. दक्षिण-आमेरिकादेशीय-भाषावंशः (South-American family of languages)

अमुख्याः केचन भाषावंशाः

१. आलताइ-भाषावंशः (Altaic family of languages)

२. एस्किमो-भाषावंशः (Eskimo family of languages)

३. आन्दामानीय-भाषावंशः (Andamanise family of languages)

४. ला-ति - भाषावंशः (La-ti family of languages)

५. तास्मानीय-भाषावंशः (Tasmanian family of languages)

६. निकटप्राच्यभाषावंशः(Near-Easter family of languages)

## इन्दो-युरोपीयभाषावंशोद्भूताः काश्चन भाषाः

इन्दो-युरोपीयभाषावंशे बहुसंख्यका भाषा अन्तर्भवन्ति। तासां कांश्चन मुख्यभूता भाषा उल्लिख्यन्ते -

**प्राचीना भाषाः** - प्राचीनग्रीकभाषा, लातिनभाषा, गथिकभाषा, आवेस्तीयभाषा, प्राचीनपारसिकभाषा, संस्कृतभाषा इत्यादयः

**आधुनिका भाषाः** - आधुनिकग्रीकभाषा, इतालीयभाषा, जार्मानभाषा, आङ्गलभाषा, फ्रान्सीयभाषा, फार्सीभाषा, हिन्दीभाषा, बङ्गीया भाषा, गुजराती भाषा, माराठी भाषा इत्यादयः।

## इन्दो-युरोपीयभाषायाः स्वरूपम् -

इन्दो-युरोपीयभाषावंशस्य नामकरणम् इन्दो -युरोपीयभाषामेव मूलीभूतत्वेन विगृह्य कृतम्। इन्दो -युरोपीयभाषा तु व्यावहारिकी, वास्तविकी सा कदापि नासीत्। अस्या भाषायाः स्वरूपं भाषातत्त्वविद्भिः ऐतिहासिकपद्धतीं तुलनामूलकपद्धतीं च अवलम्ब्य अनुमितम्। अत एव भाषेयं सर्वथा काल्पनिकी पुनर्निर्मिता च। ग्रीक -लातिन-गथिक-संस्कृत-आवेस्तीय-प्राचीनपारसिक-प्रभृतीनां भाषाणां ध्वनिविशेषान् शब्दरूपविशेषान् धातुरूपविशेषान् वाक्यनिर्माणरीतिविशेषांश्च पर्यालोच्य इन्दो-युरोपीयभाषायाः ध्वन्यादयः अनुमानबलेन निरूपिताः।

युरोपमहादेशत आरभ्य भारतभूमिपर्यन्तं सुविस्तृते भूखण्डे इन्दो -युरोपीयभाषायाः शाखाः प्राशाखाश्च व्यवह्रियन्ते। भाषातत्त्वस्य आलोचनायाः प्राथमिके पर्याये इन्दो -युरोपीयभाषा यद्यपि आर्यभाषारूपेण इन्दो -जार्मानभाषारूपेण, इन्दो-केल्तिकभाषारूपेण वा आख्याता आसीत् तथापि इदानीं बोधसौकर्यार्थं भौगलिकदृष्ट्या इन्दो-युरोपीयभाषा इत्येवमेव अभिधीयते।

इन्दो-युरोपीयभाषायाः महत्त्वं नितरामनुभूयते -

१. अस्या भाषाया व्याप्तिर्विद्यते विशालतमे भाषाभूखण्डे। भौगोलिक -क्षेत्रफलदृष्ट्या इन्दो -युरोपीयभाषावंशस्य स्थानं प्रथमत्वेन ग्राह्यम्।

२. इन्दो-युरोपीयभाषायाः उद्भूतानां भाषाणाम् उपभाषाणां च संख्या सुविपुला भवति। एतासां भाषाणामुपभाषाणां च व्यवहृकर्तृणां संख्यापि समधिका।

३. आङ्गलभाषायाः प्रभावः विश्वं व्याप्य वर्तते।

४. साहित्यरचनाक्षेत्रे विज्ञानभावनायां सभ्यताप्रसारे च आङ्गलबङ्गीयादीनां भाषाणाम् अवदानमतुलनीयं प्रतिभाति।

५. भाषाविज्ञानस्य विकाशे संस्कृतादीनां भाषाणां विश्लेषणम् अपरिहार्यमासीत्।

६. भाषाविज्ञानानुसारेण इन्दो-युरोपीयभाषावंशोद्भूतानां भाषाणां परिशीलनं यथासम्भूतं न तथा कृतं सेमीय - हामीयादिवंशोद्भूतानाम् आरवीयादिभाषाणाम्।

## इन्दो-युरोपीयभाषायाः वैशिष्ट्यानि

इन्दो-युरोपीयभाषा ऐतिहासिकपद्धतिं तुलनामूलकपद्धतिम् अवलम्ब्य पुनर्निर्मिता भाषा। अत एव ग्रीकलातिनसंस्कृतादीनां यानि साधारणानि वैशिष्ट्यानि परिलक्ष्यन्ते तान्येव इन्दो-युरोपीयभाषाया वैशिष्ट्यत्वेन गण्यन्ते। तानि यथा --

१. रूपतत्त्वगतदृष्ट्या (I.E.) इ.यु.-भाषा समन्वयिनी , श्लिष्टयोगात्मिका वा भाषा। मूलशब्दात् मूलधातोर्वा प्रत्ययविभक्तियोगो जातः। प्रत्ययानां प्राचुर्यात् शब्दरूपाणां धातुरूपाणां च वैचित्र्यम् आसीत्। मूलशब्दात् विभिन्ना नूतनाः शब्दाः निर्मिताः अभवन्।

२. सेमीय-हामीयगोष्ठीभूतासु आरवीयादुभाषुसु प्रत्ययप्रयोगः शब्दानाम् अन्तर्भवति। इन्दो-युरोपीयभाषायां प्रत्ययप्रयोगस्तु शब्दानां बहिर्भागे बाहुल्येन भवति।

३. इन्दो-युरोपीयभाषा यद्यपि आदौ संश्लेषात्मिका आसीत् तथापि पश्चात् विवर्तनवशात् विश्लेषात्मिका जाता। अत एव वाक्यमध्ये पदानाम् अवस्थानस्य गुरुत्वं क्रमशः वर्धितम्।

४. धातुमूलं प्रायशः एकाक्षरमेवासीत्। प्रत्ययविभक्त्यादियोगेन तेषामाकारपरिवर्तनं जातम्।

५. धातोः पूर्वभागे एव उपसर्गयोगः यद्यपि नियत आसीत्तथापि कदाचित् व्यतिक्रमोऽपि परिदृष्टः आसीत्। वस्तुतः इन्दोयुरोपीयभाषायामादौ उपसर्गस्थानेऽर्थबोधकः कश्चित् शब्द आसीत्। पश्चात् अर्थविहीनानामुपसर्गाणां व्यवहारो जातः।

६. समासप्रक्रिया बहूनां पदानाम् ऐक्यपद्यम् अनुमतम्। ऐक्यपद्यकाले अन्तर्वर्तित्या विभक्तेर्लोपः सम्भूतः। समस्तपदस्य तु दैर्घ्यमनियतमासीत्।

७. नामपदनिर्माणे क्रियापदनिर्माणे च गुणवृद्धिक्षयरूपायाः त्रिविधायाः अपश्रुतेः (स्वरक्रमस्य वा) (Ablaut) आतिशय्यम् आसीत्। संस्कृतभाषायां कृधातोरेव कृत्यं, कर्तव्यं, कार्य्यं, करणीयम् इत्यादीनि पदानि निर्मितानि भवन्ति। आङ्गलभाषायामपि sing-धातोः sing, sang, sung, song – इत्यादीनि रूपाणि भवन्ति।

८. स्वराघातस्य (Accent) व्यवहारः आसीत्। स्वरभेदेन अर्थभेदो दृष्टः। आदौ स्वराणां संगीतात्मकत्वमासीत् , पश्चात् श्वासाघातस्य बलाधानस्य वा उद्भवो जातः।

९. प्रत्ययविभक्तीनां प्राचुर्य्यं वैचित्र्यं चासीत्। किन्तु यदा इन्दो -युरोपीयभाषातः आङ्गलादयः भाषाः सम्भूताः तदा मूलीभूतधातूनां सद्भावेऽपि प्रत्ययविभक्तीनां क्षयो विलुप्तिर्वा जाता। नवीनासु भाषासु प्रत्ययान्तरं विभक्त्यन्तरं वा स्वल्पतया संजातम्।

१०. इन्दोयुरोपीयभाषायां रूपतत्त्वस्य दृष्ट्या पुंलिङ्गादिलिङ्गत्रयम् एकवचनादिवचनत्रयं प्रथमपुरुषादिपुरुषत्रयं चासीत्। आदौ तु पुंलिङ्गस्त्रीलिङ्गयोर्भेदः स्पष्टतया नासीत्। द्विवचनप्रयोगः अद्यापि संस्कृतभाषायां लिथुयानियभाषायां च भवति।

११. क्रियापदनिर्माणव्यापारे वर्तमानादिकालविभाग आसीत्। किन्तु कालविभागः सर्वदा वर्तमानादिसमयसूचकः नासीत्। क्रियाफलभोक्तृत्वमाधारीकृत्य आत्मनेपदस्य परस्मैपदस्य च प्रयोगः आसीत्। अपि च , निर्देशकादयः पञ्चविधा भावा (moods) आसन्।

१२. इन्दोयुरोपीयभाषायां मध्यसर्गाणां (infix) व्यवहारो नासीत्।

१३. विशेष्यपदं क्रियापदम् अव्ययपदं च पृथक्तया निर्दिष्टमासीत्। कदाचित् अव्ययानामपि रूपवैचित्र्यं परिलक्षितम्। सर्वनामपदेषु रूपवैचित्र्यं सम्पन्नम्। पदरूपनिर्माणे अष्टधा विभक्तिप्रयोगः जातः।

१४. अतीतकालीनपदनिर्माणे धातूनामभ्यासो द्विर्भावो वा परिदृष्टः।

१५. असमापिकाक्रियापदानां बाहुल्यमासीत्।

१६. ध्वनितत्त्वस्य दृष्ट्या इन्दो -युरोपीयभाषायाम् स्वरव्यञ्जनादीनां विपुलं वैचित्र्यमासीत्। अतिह्रस्वस्य अ -ध्वरेनपि अस्तित्वम् अनुभूतम्। ऊष्मध्वनिष्वपि विविधं वैचित्र्यमासीत्। जार्मानभाषायाम् ऊष्म -फ-ध्वनेः व्यवहारः परिलक्षितः। कण्ठध्वनीनां त्रिविधो भेदो दृष्टः। पुरः कण्ठध्वनयः पश्चात्कण्ठध्वनयः कण्ठौष्ठ्यध्वनयश्चेति ते आसन्।

## इन्दो-युरोपीयभाषायाः उद्भूताः मुख्याः शाखाः

इन्दो-युरोपीयभाषायाः वास्तविकनिदर्शनरूपेणाद्यापि न किञ्चिद् आविष्कृतम्, तथापि तौलनपद्धत्या ऐतिहासिकपद्धत्या च निर्णीतं यत् ग्रीकलातिनादीनां प्रकृतिस्थानीया काचित् भाषा सुप्राचीनकाले अवश्यमेवासीत्। सा एवाधुनिकभाषातत्त्वविद्भिः इन्दो-युरोपीया भाषा इति कथ्यते। कालक्रमेण इन्दो-युरोपीयभाषातः दश (भाषा-)शाखाः उद्भूताः। तास्तावदेवमभिधीयन्ते -

१. ग्रीकशाखा (Greek Branch)

२. इटालिकशाखा (Italic Branch)

३. जार्मानिकशाखा ( Germanic Branch) / हिउटनिकशाखा (Tutonick Branch)

४. केल्टिकशाखा (Celtic Branch)

५. तोखारीयशाखा (Tokharian Branch)

६. हिट्टीयशाखा (Hittik Branch)

७. वाल्टोस्लाविकशाखा (Baltoslavics Branch)

८. आर्मेनीयशाखा (Armenian Branch)

९. आल्वेनीयशाखा ( Albenian Branch)

१०. इन्दो-इराणीयशाखा/आर्यशाखा (Indo-Iranik/ Aryan Branch)

**इन्दोयुरोपीयभाषाशाखानां वर्गद्वयं विभागः** (केन्तुम्-वर्गः, सतम्-वर्गश्च)

(Centum and Satəm Groups)

१८७०-खीष्टाब्दे अयास्केलिमहोदयेन (Prof. Ascoli) सिद्धान्तितं यत् इन्दो-युरोपीयभाषायाः पुरःकण्ठः स्पृष्टाः ध्वनयः (*k̑, k̑h, ĝ, ĝh, ṅ -इत्येते) शाखाविशेषेषु पश्चात्कण्ठ्यध्वनिभिः सह एकीभूता सञ्जाताः, पुनश्च शाखान्तरेषु ते उष्मध्वनिरूपेण विवर्तिताः। अत एव, वर्गद्वयं कल्पितम्। एकस्मिन् वर्गे इन्दो-युरोपीयः तालव्यः *k̑-ध्वनिः पश्चात्कण्ठ्यध्वनिरूपेण k-ध्वनौ रूपान्तरितः अभवत्। अपरस्मिंश्च वर्गे स एव तालव्यः *k̑-ध्वनिः s-ध्वनिरूपेण ś-ध्वनिरूपेण वा विवर्तितोऽभवत्। इममेव व्यापारं स्पष्टीकर्तुं शतसंख्यावाचकः इन्दो-युरोपीयः *k̑m̥tom इति शब्दः परिगृहीतः। अस्य समार्थकशब्दास्तु एकस्मिन् वर्गे एवं दृश्यन्ते -

१. ग्रीकशाखायां he-katom

२. इटालीकशाखायां Centum

३. जार्मानिकशाखायां गथिकभाषायां (k)hund

४. आङ्गलभाषायां Hundred

५. केन्तुमशाखायाम् ओयेल्सभाषायां Cant

६. प्राचीन-आइरिश-भाषायां च Cet

७. तोखारीय-शाखायां कुचीयभाषायाम् - kant(e) Kand(e)

अस्य वर्गस्य प्रतिनिधिरूपेण लातिनशब्दः केन्तुम् (Centum) इति परिगृहीतम्। एतदनुसारेण वर्गविशेषस्य नामकरणं केन्तुम् वर्गः इति जातम्। केन्तुम्-वर्गे न केवलं ग्रीकादयः उक्ता, हिराइटशाखा अन्तर्भवितुमर्हति। इत्थं केन्तुम्-वर्गे षट् शाखाः संगृहीताः।

इन्दो-युरोपीयभाषास्थस्य – k̑ m̥ tom इति शब्दस्य समार्थकशब्दाः अपरस्मिन् वर्गे एवंप्रकारेण परिदृष्टाः।

| | | |
|---|---|---|
| १. इन्दो-युराणीय-शाखायां | संस्कृतभाषायाम् | śatam |
| | आवेस्तीयभाषायां | satəm |
| | प्राचीनपारसिकभाषायां | Qatagus |
| २. बाल्टोश्लाविकशाखायाम् | लिथुयानियभाषायां | szimtas |
| | प्राचीनाचार्चस्लावीयभाषायां - | sūto |
| | रुशभाषायाम् | sto |

अस्य वर्गस्य प्रतिनिधिरूपेण आवेस्तीयभाषायाः satəm इति शब्दः परिगृहीतः। एतदनुसारेण वर्गस्यास्य नामकरणं satəm-वर्गः इति जातम्। satəm-वर्गे इन्दो-इराणीयशाखा, आल्वेनीयशाखा, आर्मेनीयशाखा, बाल्टोश्लाविकशाखाश्चेति चतस्रः शाखा अन्तर्भवन्ति।

ग्रीकभाषायाः विवरणम् -

केन्तुम्-वर्गीयभाषासु अन्यतमा ग्रीकभाषा। प्राचीनकाले भाषेयं ग्रीसदेशे एशिया -माइनरभूभागस्य उपकुलभागे साइप्रासद्वीपे इजियानद्वीपपुञ्जे च प्रचलिता आसीत्। क्रीटद्वीपे लब्धे प्रत्नलेखे ग्रीकभाषायाः प्राचीनतमरूपस्य (खीष्टपूर्वीयचतुर्थशतकीयम्) निदर्शनमस्ति। प्राचीनग्रीकभाषायाः मुख्याः उपभाषास्तावत् अयाओनिक -आट्टिक-टोरिक-इत्यादयः भवन्ति। इलियाड-ओडिसि इति महाकाव्यद्वयम् आयोनिकोपभाषामवलम्ब्य परवर्तिकालिनं पद्यसाहित्यं च आट्टिकोपभाषामवलम्ब्य रचितम्। कोईने-ग्रीकभाषातः आधुनिकग्रीकभाषायाः उत्पत्तिर्जाता।

युरोपीयसभ्यतायाः विकाशः खलु प्राचीनग्रीसे एवाभवत्। प्राचीनग्रीकभाषया रचितं साहित्यं दर्शनं विज्ञानञ्च युरोपीयसभ्यतायाः मूलम्। प्राचीनग्रीकभाषातः आधुनिकग्रीसभाषायाः पार्थक्यं स्वल्पमेव। (ग्रीकभाषाया विकाशव्यापारे होमारयुगं साहित्यिकयुगं संक्रमणयुगं वर्तमानयुगं चेति युगचतुष्टयं स्वीकृतम्। वर्तमानसाहित्यिकयुगं खीष्टीयाष्टदशशतकादारब्धम्।) आदौ हेलेनिकभाषारूपेण ग्रीकभाषाया आख्या आसीत्।

**ग्रीकभाषाया वैशिष्ट्यानि -**

प्राचीनग्रीकभाषायाम् इन्दो-युरोपीयभाषायाः शब्दविद्याविषयकाणि वैशिष्ट्यानि बाहुल्येन संरक्षितानि। इन्दो -युरोपीया स्वरध्वनयः अत्र बाहुल्येन दृश्यन्ते। इन्दो-युरोपीया *ă, ĕ, ŏ इत्येते स्वराः, यौगिकस्वराश्च अत्र स्पष्टतया उपलभ्यन्ते। यथा वेदे तथैवात्र ग्रीकभाषायां मूलीभूतायाः भाषायाः प्रस्वरव्यवस्था शब्दरूपव्यवस्था धातुरूपव्यवस्था च अक्षुण्णा एव राजते। ग्रीकभाषायां ध्वनिव्यवस्था एवं दृश्यते---

स्वराः - a, i, u, e, ē, o, ō,
ai, ei, oi, au, eu, ou,
āi, ēi, ōi, āu, ēu, ōu इति।

व्यञ्जनध्वनयः -- k, x, g,

t, Θ, d, n

p, φ, b, m

r, l

s, z, ks, ps इति।

अपराणि च कानिचन वैशिष्ट्यानि -

१. ग्रीकभाषायां पदान्तरस्थितानि व्यञ्जानानि प्रायशः लुप्यन्ते। r, n, s इत्येते ध्वनयस्तु पदान्तस्थिता अप दृश्यन्ते।

२. (इन्दो-युरोपीय) *s-ध्वनिः शब्दानामादिभागे यदि तिष्ठति तर्हि स ग्रीकभाषायां h-ध्वनौ परिवर्तते, स्वरमध्ये तु लुप्यते। अन्यत्र अविकृतस्तिष्ठति। यथा इ.यु. *Septṃ > ग्री. hepta.

३. इन्दो-युरोपीयघोषमहाप्राणध्वनिः ग्रीकभाषायाम् अघोषमहाप्राणध्वनौ परिणमते।

यथा - इ. यु. * dhūmos > ग्री. thermos

इ. यु * bhū > ग्री. phū

इ.यु * medhu > ग्री. methu

४. इ.यु. *ṛ, *ḷ इति ध्वनिद्वयस्य ग्रीकभाषायां ar/ra, al/la इत्येवं सञ्जातम्।

५. मूलभाषायां पुरःकण्ठ्यध्वनीनां कण्ठ्यध्वनीनां च ग्रीकभाषायां संमिश्रणं संघटितम्।

६. यद्यपि संस्कृतभाषायां विशेष्यपदेषु सर्वनामपदेषु च रूपवैचित्र्यं लक्ष्यते ग्रीकभाषायां तु क्रियापदानाम् अव्ययपदानां च रूपवैचित्र्यं लभ्यते।

७. मूलभाषायाः कण्ठ्यौष्ठ्यध्वनीनां परिवर्तनं ग्रीकभाषायाम् ओष्ठ्यध्वनिषु जायते।

८. यद्यपि संस्कृतभाषायां कालवाचकानां क्रियापदानामाधिक्यमस्ति तथापि ग्रीकभाषायां तु तुमन्तपदानां निष्ठाप्रत्ययान्तपदानां त्त्वार्थप्रत्ययान्तपदानां धातुजकृदन्तशब्दानाञ्च बाहुल्यं संलक्ष्यते।

## ग्रीक-संस्कृतयोः सादृश्यानि

कीटद्वीपे प्राप्तानां प्रत्नलेखानां माइकेलभेन्ट्रिसादिभिः पाठसम्भवात् वैदिकभाषया सह ग्रीकभाषाया तुलनया भोषयोरुभयोः बाहुल्येन सादृश्यानि परिलक्षितानि। यथा -

१. वैदिकभाषायां ग्रीकभाषायाम् इन्दोयुरोपीया ध्वनयः सुरक्षिताः तिष्ठन्ति। मूलीभूताया भाषायाः स्वरध्वनीनां विशेषतया यौगिकस्वराणां संरक्षणं ग्रीकभाषायां परिदृश्यते। वैदिकसंस्कृतभाषायां तु व्यञ्जनानां आधिक्यं वर्तते।

२. ग्रीकभाषायां संस्कृतभाषायां च इन्दो-युरोपीयस्य *ṃ, * n इति ध्वनिद्वयस्य a-ध्वनौ परिवर्तनं जातम्।

३. उभयत्र कारकभेदेन शब्दरूपाणां भिन्नता लक्ष्यते।

४. उभयत्र कर्तृ-कर्म-सम्प्रदान-सम्बन्ध-सम्बोधनपदानां स्वतन्त्राणि रूपाणि लभ्यन्ते।

५. ग्रीक-संस्कृतयोः उपसर्गाणां क्रियाविशेषणानां च बाहुल्यं वर्तते।

६. उभयत्र द्विवचनान्तं पदं लभ्यते।

७. उभयत्र धातुरूपनिर्माणव्यापारे प्रायः समाना प्रक्रिया दृश्यते। क ) उभयत्र आत्मनेपद -(middle voice) – परस्मैपदानां (active voice) व्यवहारो गोचरीक्रियते । ख ) संस्कृतभाषायां क्रियारूपेषु गणानां तथा णिजन्तसन्नन्तयङन्तादिपदानां प्राचुर्यं वर्तते। ग्रीकभाषायां तु निष्ठाप्रत्ययान्तानां तुम् -त्त्वादिप्रत्ययान्तानां पदानां च बाहुल्यमस्ति।

८. ग्रीकसंस्कृतभाषयोः समासप्रक्रियया दीर्घ-दीर्घतरपदनिर्माणं सम्भवति।

९. उभयत्र लिङ्गत्रयस्य व्यवहारो दृश्यते।

१०. उभयत्र शब्दनिर्माणव्यापारे सन्निहितं महाप्राणध्वनिद्वयं न दृश्यते। आदिस्थमहाप्राणध्वनिः अल्पप्राणत्वेन व्यवह्रियते।

११. उभयत्र भावानां (mood) वैचित्र्यं विद्यते।

संस्कृतभाषया सह ग्रीकभाषायाः तुलनया यत्सादृश्यम् अनुभूयते तस्य सुखबोधाय एकस्य ग्रीकवाक्यस्य संस्कृतरूपान्तरं प्रकल्प्यते। अर्थस्य स्पष्टीकरणार्थम् आङ्गलभाषासम्मतं वाक्यमपि प्रदर्श्यते।

ग्री. - hoi ton ge proti astu pheron.

सं - te tam ha prati vastu abharan.

आङ्गल (पदशः) - They him indeed towards City bore.

आङ्गल – They indeed bore him to the city.

## <u>ध्वनिसूत्रम् (Phonetic Law)</u>

भाषायाः प्रवाहः स्रोतस्विनी इव भवति। जीवितस्य भाषाविशेषस्य व्यवहारः कालात् कालान्तरे देशात् देशान्तरे च सम्भवति। किन्तु यदि भाषाव्यव हर्तृणां मध्ये कालिकं व्यवधानं दैशिकं व्यवधानं वा जायते तर्हि भाषाया परिवर्तनशीलता परिलक्ष्यते। एवंविधायाः परिवर्तनशीलतायाः स्वरूपं स्पष्टीभवति भाषायाः प्रत्यवयवम् एव। अत एव भिन्नेषु कालेषु भिन्नेषु देशेषु च भाषाविशेषस्य भाषाविशेषाणां वा ध्वनिरूपपरिवर्तनं पदरूपपरिवर्तनम् अर्थरूपपरिवर्तनं च अवश्यमेव भवति। भाषायाः व्यवहारे ध्वनीनां क्षुत्रतमावयवत्वात् तेषामेव परिवर्तनं सुष्ठु दरीदृश्यते। एतादृशं परिवर्तनं कुत्रचिद् व्यापकरूपेण कुत्रचिच्च नियन्त्रितरूपेण च सम्भवति। यदा परिवर्तनं व्यापकं भवति तदा तस्य कश्चित् नियमं दर्शयितुं चेष्ठ्यते। एवंविधो नियम एव ध्वनिनियम इत्युच्यते। अयमेव ध्वनिनियमो यदा सूत्राकारेणोपस्थाप्यते तदा तत्सूत्रं ध्वनिपरिवर्तनसूत्रमित्युच्यते। संक्षेपतः तदेव सूत्रं ध्वनिसूत्रमित्यभिधीयते। अत एव टुकारमहोदयेनोक्तं - “A phonetic law of a language is a statement of the regular practice of that language at a particular time in regard to the treatment of a a particular sound or group of sound in a particular setting.”

तस्मात् यदा कस्मिंश्चित् कालविशेषे अवस्थाविशेषवशात् भाषाविशेषस्य कस्यचिद् ध्वनेः केषाञ्चिद् ध्वनीनां वा परिवर्तनं परिलक्ष्य ध्वनिपरिवर्तननियमः आविष्क्रियते तदा स एव निषमः ध्वनिनियम इत्युच्यते। यदि कश्चिद् ध्वनिनियमः सूत्राकारेणोपस्थापितो भवति तर्हि स एव नियमः ध्वनिसूत्रमिति कथ्यते।

## ध्वनिनियमस्य ध्वनिसूत्रस्य वा वैशिष्ट्यानि

ध्वनिनियमस्य ध्वनिसूत्रस्य वा प्रागुल्लिखितात् लक्षणात् कानिचन वैशिष्ट्यानि सूच्यन्ते -

१. ध्वनिनियमः भाषाविशेषे प्रयोज्यते। भाषान्तरेषु तस्य प्रयोगो न भवति।

२. ध्वनिनियमः कालविशेषे प्रयोज्यो भवति। आङ्लभाषायाम् अन्तिमः r-ध्वनिः प्रायशो नोच्चारितो भवति। नियमोऽयं वर्तमानकाले प्रयुज्यते न तु भूतकाले।

३. ध्वनिनियमस्य प्रयोगः अवस्थाविशेषे एव भवति, न तु स सार्वत्रिकः। आङ्लभाषायां r-ध्वनेरुच्चारणं तदैव भवति यदा r-ध्वनेरवस्थानं शब्दशेषे भवति।

४. ध्वनिनियमो भाषाविशेषस्य ध्वनिविशेषेषु प्रयोज्यते, न तु सर्वेष्वेव ध्वनिषु।

## मुख्यानि कानिचन ध्वनिसूत्राणि -

तौलनप्रक्रियया ऐतिहासिकपद्धत्या च इन्दो -युरोपीयभाषावंशान्तर्भूतानां भाषाणाम् अनुशीलनं विश्लेषणं च यदारब्धं तदा कानिचन ध्वनिसूत्राणि आविष्कृतानि। निम्नलिखितानि ध्वनिसूत्राणि तेषां मुख्यतमानि -

१. ग्रीमसूत्रम्

२. भार्णारसूत्रम्

३. ग्रासमानसूत्रम्

४. कोलित्ससूत्रम्

५. फर्चुनाभकसूत्रम्

## ग्रीमस्य सूत्रम् (Grimm's Law)

ध्वनिसूत्रेषु ग्रीमस्य सूत्रम् अतीवगुरुत्वपूर्णम्। सूत्रेणानेन जार्मानभाषायाः ध्वनिपरिवर्तनं निर्देशितम्। एवंविधं ध्वनिनियमं प्रति रास्कमहोदयेन (R. Rask) आयार्-महोदयेन (Ihre) चादौ १८१९ ख्रीष्टीयाब्दे भाषागवेषकाणां दृष्टिराकृष्टा। तदा नियमस्य पूर्णता न विहिता। किन्तु १८२२ खृष्टीयाब्दे यदा इयाकवग्रीममहोदयेन (Iacob Grimm) जार्मानभाषाया व्याकरणस्य द्वितीयं संस्करणं प्रकाशितं तदा तेनैव तत्र तौलनप्रक्रियया ग्रीक -लातिन-संस्कृत-जार्मानादिभाषाणां वैशिष्ट्यानि आलोचितानि। तेन च लक्षितं यत् मूलीभूतायाः इन्दो -युरोपीयभाषायाः केषाञ्चन व्यञ्जनध्वनीनां जार्मानशाखायां नियतरूपेण परिवर्तनं भवति। परिवर्तनमेतत् अतीवव्यापकमासीत्। अत एव ग्रीम -महोदयेन सूत्राकारेण तादृश-ध्वनिपरिवर्तनप्रकारः प्रदर्शितः। परिवर्तनस्यैतस्य आख्या आदौ आसीत् " Laut Virschubung" (=sound Shifting)। ततः म्याक्समूलरमहोदयेन ग्रीमस्य नामानुसारेण Grimm's Law (ग्रीमसूत्रम्) इत्येवं नामकरणं कृतम्। ग्रीमकृतो नियमो जार्मानभाषायां पर्यायद्वये

संघटितस्य ध्वनिपरिवर्तनस्य निर्देशक आसीत्। प्रथमं यद्ध्वनिपरिवर्तनं जातं तत्तु प्रागैतिहासिककाले एव सम्भूतम्। तदा यद्यपि ग्रीक-लातिन-संस्कृत-श्लाविकादिषु भाषासु मूलीभूतायाः इन्दो -युरोपीयभाषायाः केचित् व्यञ्जनध्वनयः अविकृता आसन्, तथापि जार्मानशाखान्तर्गतासु गथिक -आङ्गल-ओलन्दाजादिषु भाषासु तेषां परिवर्तनं परिदृष्टम्। एतदेव ध्वनिपरिवर्तनं प्रथमध्वनिपरिवर्तनत्वेन (First Sound Shifting) संज्ञापितम्। परिवर्तनप्रकार-निर्देशक-सूत्रानुसारेण त्रिविधं परिवर्तनं जातम्।

प्रथमं परिवर्तनं तावत् -

क) मूलीभूताया इन्दो -युरोपीयभाषायाः *gh, dh, bh इत्येतेषां सघोष -महाप्राण-स्पर्श-ध्वनीनां जार्मानशाखायां घोषाल्पप्राणस्पर्शध्वनित्वेन g, d, b – इत्याकारेण परिवर्तनं संसाधितम्। अर्थात् -

इ.यु. भाषायां - * gh, * dh, * bh >जार्मानशाखायां g, d, b

अत एव, * gh > g

यथा - इ.यु. *ghotis > गथिक - gasts, प्रा. आङ्गल- gist, आङ्गल – guest (जार्मान), लातिन- hostis

इ.यु. - * ghanso > आङ्गल- goose (जार्मान), प्रा. भा. आ. Hansa

अत एव, *dh > जार्मानशाखायाम् d

यथा, इ.यु. * roudhos > ग. Rauts, प्राचीन-नर्स- rouər (जार्मानिकशाखायाम्), प्रा. भा. आ. Rudhiras

इ.यु. * bh > जा.शा. d

यथा, इ.यु. * nebhos > ग. Nibls (जा.शा.)

प्रा.भा.आ. - nabhos, ला - nebula

ख) मूलीभूतायाः इन्दोयुरोपीयभाषायाः *g, *d, *b इत्येतेषां घोषाल्पप्राणस्पर्शध्वनीनां जार्मानशाखायाम् अघोषाल्पप्राणस्पर्शध्वनित्वेन जार्मानशाखायां k, t, p – इत्यादिकारेण परिवर्तनं जातम्।

अर्थात् - इ.यु. *g > जा.शा. k

यथा, इ.यु. * ĝōnu > ग. kniu, प्रा.उ.जा kneo, प्रा. आं. - cnēo, आं - knee {जार्मानशाखा}

प्रा.भा.आ. - janu, ग्री - gonu, ला - genee

इ.यु. - *d > जा.शा. t

यथा, इ.यु. * deḱṃ > ग. taihum, प्रा.उ.जा. zehan, प्रा.आ. - tien, आं - ten {जा.शा}

प्रा.भा.आ - daśa, ग्री. deka, ला. decem

इ.यु. *b>p

यथा, इ.यु. *dubūs>ग. diups, आं - deep (जा.शा.), लिथु. - dubus

ग) मूलीभूताया इ .यु. भाषायाः अघोषाल्पप्राणस्पर्शध्वनीनां *k, *t, *p इत्येतेषां जार्मानशाखायाम् अघोषमहाप्राणोष्मध्वनित्वेन x (=h), ***θ*** /þ, f इत्याकारेण परिवर्तनं जातम्। अर्थात् -

इ.यु. *k, *t, *p > (जा.शा) x (=h), ***θ***/ þ, f

इ.यु. *k > जा.शा. x (=h)

यथा, - इ.यु. *qu̯os > ग. hwas (जार्मानशाखायाम्), प्रा.भा.आ. Kaḥ, ग्रीक – pos

इ.यु. *t> जा.शा. ***θ***/ þ,

यथा, इ.यु. * tu̯am > प्रा.आं - þu, आं, thou (जा.शा.), प्रा.भा.आ - tvam, ला. tu

इ.यु. *p > जा.शा. f

यथा, इ.यु. *pədos > ग. fōtus, प्रा.उ.जा. - fuoz, आं - feet – (जा.शा.),

प्रा.भा.आ - pādaḥ, ग्रीक. pēdos, ला. pēs

द्वितीयं ध्वनिपरिवर्तनम् -

द्वितीयं ध्वनिपरिवर्तनं खृष्टीये सप्तमशतके जार्मानभाषामध्ये एव संघटितम्। जार्मानभाषायाः रूपद्वयं वर्तते - निम्नजार्मानरूपम्, उच्चजार्मानरूपञ्च। ध्वनिपरिवर्तनं निम्नजार्मानभाषातः उच्चजार्मानभाषायामेवाभवत्। एतदपि ध्वनिपरिवर्तनं ग्रीममहोदयेनैव निर्णीतम्। परिवर्तनप्रकारस्तु एवम् -

क) निम्नजार्मानभाषायाः k, t, p – इत्येते ध्वनयः उच्चाजार्मानभाषायां kh, th (s), ph – इत्येवं जाताः।

ख) निम्नजार्मानभाषायाः kh, th, ph – इत्येते ध्वनयः उच्चजार्मानभाषायां g, d, b – इत्येवं जाताः।

ग) निम्नजार्मानभाषायाः g, d, b – इत्येतेव ध्वनयः उच्चजार्मानभाषायां k, t, p – इत्येवं जाताः।

आङ्गलभाषां निम्नजार्मानभाषायाः प्रतिनिधिस्थानीयां विचिन्त्य कानिचनोदाहरणानि उल्लिख्यन्ते -

| | आङ्गल | उच्चजार्मान |
|---|---|---|
| k > kh | book | buch (kh) |
| th > d | three | drei |
| d >t | God | Gott |

**ग्रीमसूत्रस्य न्यूनता -**

ग्रीमसूत्रं यद्यपि अनेकत्र परीक्षितं तथापि तस्य अप्रयोज्यत्वं प्रतीयते। यथा - १. K, t, p – इत्येतेभ्यो ध्वनिभ्यः प्राक् यदि s-ध्वनिः स्यात् तर्हि ग्रीमसूत्रस्य न्यूनता परिलक्ष्यते। यथा - इ.यु. *esti > ग. Ist (अत्र t -ध्वनिस्थाने th-ध्वनिः सम्भाव्य आसीत्।)

**ग्रीमसूत्रस्य गुरुत्वम् -**

ग्रीमसूत्रं यद्यपि सर्वत्र सफलं न भवति तथापि एतस्य गुरुत्वम् अनस्वीकार्यं भवति। एतत्सूत्रानुसारेण प्राचीनतरायाः भाषायाः (विशेषतः इ.यु-भाषायाः) शब्दपरिकल्पनं सुकरं भवति। जार्मानभाषया सह संस्कृतभाषायाः अपि सम्बन्धः स्थिरीक्रियते इति शम्।

## ग्रासमानस्य सूत्रम् (Grassmann's Law)

ग्रासमानस्य सूत्रं ध्वनिपरिवर्तनविषयकसूत्रेषु अन्यतमं मुख्यं सूत्रम्। एतच्च सूत्रं जार्मानविदुषा हेर्मानग्रासमानेन १८६२ खृष्टीयाब्दे प्रणीतम्। तस्यैव नामानुसारेण ग्रासमानसूत्रमित्याख्या जाता। एतच्च सूत्रं त्रुटिबाहुल्यात् असम्पूर्णस्य ग्रीमसूत्रस्य यथासम्भवत्रुटिनिरसनेन कथञ्चित् पूर्णताविधानाय आविष्कृतम्।

ग्रीमसूत्रस्य सामभूतं तात्पर्यमेतदेव भवति यत् खृष्टपूर्वपञ्चमशतके मूलीभूताया इ.यु.-भाषायाः केषाञ्चन स्पृष्ट-व्यञ्जन-ध्वनीनां जार्मानशाखायां नियतं परिवर्तनं जातम्। तथाहि मूलीभूतायाः इ .यु.भाषातः जार्मानशाखायां परिवर्तनकाले वर्गीयाणां चतुर्थवर्णानां स्थाने तृतीयवर्णाः, तृतीयवर्णानां स्थाने प्रथमवर्णाः, प्रथमवर्णानां स्थाने च ऊष्मीभूता द्वितीया वर्णाः सञ्जाताः।

यथा - इ.यु. *dek̑m̥ > गथिक taihun, आङ्गल - ten

इ.यु. * tu̯am > गथिक þu, आङ्गल – thou

इ.यु. * nebhos > गथिक nibls,

किन्तु नियमोऽयं न सार्वत्रिक आसीत्। ग्रीमसूत्रानुसारेण इ.यु. b-ध्वनेः, d-ध्वनेश्च स्थाने जार्मानशाखायां यथाक्रमं p-ध्वनिः, t-ध्वनिश्च स्वाभाविक आसीत्। किन्तु वास्तविकतया सर्वत्र तथा न भवति। b-ध्वनिः, d-ध्वनिश्च जार्मानशाखायामपि क्वचित् अपरिवर्तितस्तिष्ठति। यथा -

प्रा.भा.आ. - bandh

ग्रीक – penth

आङ्गल – bind, bindah – इत्येतौ। अनुमितस्य bendh(?) इत्यस्य b-ध्वनिः अपरिवर्तितस्तिष्ठति। अपि च,

प्रा.भा.आ. - badhati.........................(किञ्चित् स्थलं न बुध्यते)

इ.यु < * bendh (?) जा. binden, आङ्गल – bind

इ.यु. * bendhoti (?) ग. (bindan)

इ.यु * dabh (?) > daubs इति। एवंप्रकारेण ग्रीमसूत्रस्य अप्रयोज्यता अपूर्णता च लक्ष्यते।

हेर्मानग्रासमानः ग्रीमसूत्रस्य त्रुटिनिरसनाय अचेष्टत। स तु संस्कृतभाषायां ग्रीकभाषायां च व्युत्पन्न आसीत्। तेन लक्षितं यत् संस्कृतभाषायां (खन्) √-khan-धातोः (चखान) Cakhāna – इति, √ sthā – धातोः tiṣṭhāmi इति, √dhāv -धातोश्च dadhāva इत्येवं धातुरूपाणि सम्भवन्ति। पुनश्च तेनैव लक्षितं यत् ग्रीकभाषायां √khainō-धातोः kakhena इति, √thallo-धातोः tahēla इति, √pheugō-धातोः papheugo इत्येवं धातुरूपाणि सिद्ध्यन्ति। व्याकरणनियमानुसारेण

एवमेव भवति। यदि सन्निहिते अक्षरद्वये महाप्राणध्वनिद्वयं विद्यते तर्हि संस्कृते ग्रीके चोभयत्र महाप्राणध्वनिद्वयस्य अन्यतरः (प्रायः प्रथमः) महाप्राणतां त्यजति। अतः प्रा.भा.आ. dadhāmi, babhāra, juhoti इत्यादीनि

ग्रीक - tethemi, pephuka, kekhoromen – इत्यादीनि च रूपाणि भवन्ति। एवंविधेभ्यः धातुरूपेभ्यः ग्रासमानमहोदयेन ध्वनिसूत्रस्यैतस्य संकेतः प्राप्तः। नियमाकारेण सूत्रं च तेन प्रणीतम्। एतदेव सूत्रं ग्रासमानसूत्रमित्युच्यते। एतत्सूत्रेण विहितं भवति यत् मूलीभूतायाम् इ .यु.भाषायां यदि सन्निहिते अक्षरद्वये महाप्राणध्वनिद्वयं विद्यते तर्हि ग्रीकभाषायाम् इन्दो -इराणीयभाषायां च (अत एव प्राचीनभारतीयभाषायामपि) महाप्राणध्वनिद्वयस्य प्रथमः अल्पप्राणध्वनित्वेन विवर्तितो भवति। यदि च , कुत्रचित् प्रथमस्य महाप्राणत्वम् अपरिवर्तितं स्यात् तर्हि अवश्यमेव द्वितीयो महाप्राणध्वनिः अल्पप्राणध्वनित्वेन विपरिणमते।

सूत्रमिदं संस्कृतभाषायां ग्रीकभाषायां च सततं प्रयुज्यते। संस्कृते प्रथमः सघोषः महाप्राणध्वनिः घोषाल्पप्राणध्वनित्वेन रूपान्तरितो भवति। ग्रीकभाषायां तु आदौ अघोषस्पर्शत्वेन परिवर्तितः सन् पश्चात् अल्पप्राणत्वेन रूपान्तरितो भवति। अतः ग्रीके आदौ bh-ध्वनेः ph-ध्वनेः p-ध्वनिः भवति। यथा -

इ.यु * bheudhomai > प्रा.भा.आ. bodhāmi,

ग्रीक. peuthomai

इ.यु * dhedhēmi > प्रा.भा.आ. Dadhāmi

ग्रीक. Tithēmi

इ.यु. * bhedhū > प्रा.भा.आ. babhūva

ग्रीक. Pephūka

एतत्सूत्रम् इ.यु.भाषायाः शब्दानां मूलरूपकल्पने साहाय्यं करोति। अत एव *bendh, * beudhoti, dabh- इत्येते शब्दाः इ.यु.-शब्दत्वेन न कल्पनीया भवन्ति। तेषां स्थाने यथाक्रमं *bhendh, *bhendhoti, *dhabh – इत्येतेषां शब्दानां कल्पनं समीचीनं भवति। यद्येवं स्यात् तर्हि ग्रीमसूत्रमपि सङ्गतं भवति। जार्मानशाखायाम् इ .यु. * bh-इत्येतस्य, b-ध्वनित्वेन परिवर्तने ग्रीमसूत्रस्य उपयोगिता अव्याहता भवति।

ग्रासमानसूत्रस्य गुरुत्वम् -

ग्रासमानसूत्रं न केवलं ग्रीकभाषायां संस्कृतभाषायां च सफलं भवति, अस्य सूत्रस्योपयोगिता अन्यत्रापि अनुभूयते --

१. ग्रीमसूत्रस्य आपाततः असम्पूर्णता निरस्यते --

२. धातुरूपनिर्माणे ग्रीकसंस्कृतयोः सादृश्यं स्फुटतरं भवति।

३. इ.यु.-भाषया सह संस्कृतस्य सम्बन्धः सुदृढो भवति।

# भाषाविज्ञानम्

भाषाविज्ञानमिति नवीनैका विद्या। विद्यायाः अस्याः अनुशीलनं यथाधुना भवति , न तथा प्राचीनकाले आसीत्। व्याकरणशास्त्रेण शब्दानाम् अनुशासनमेव सम्पन्नं, किन्तु भाषिकदृष्ट्या तेषां विवर्तनं नालोचितम्, तौलनप्रक्रियया च तेषामध्ययनं विश्लेषणं वा न कृतम्। इदानीं तु तदेव ऐतिहासिकदृष्ट्या सम्पाद्यते। (भाषाविज्ञानमित्याख्यायां नवीनायां शब्दविद्यायाम् एतत्सर्वं विचिन्त्य भाषाविज्ञानशब्दस्य तात्पर्यं निरूप्यते, स्वरूपञ्चावधार्यते भाषाविज्ञानस्य।)

भाषायाः विज्ञानं भाषाविषयकं विज्ञानं वा भाषाविज्ञानम्। अपि च , विशिष्टं ज्ञानं विज्ञानम्। यद्यपि भाषाशब्देन सामान्येन तदेव साधनं बोध्यं येन भावानां द्योतनं भवति , तथापि भाषातत्त्वविद्भिः तन्न स्वीक्रियते। आकारेङ्गितचेष्टादिकानामपि भावानां द्योतकत्वात्। (अत एव भाषास्वरूपं सम्यक्प्रकारेण निर्णेतुं चेष्टितं भाषातत्त्वविद्भिः। भाषास्वरूपविषये तेषां मतानि बहुविधानि सन्ति। भाषाचार्याणां सुनीतिकुमारचट्टोपाध्यायानामभिमतमेवं - মনের ভাব প্রকাশের জন্য বাগ্-যন্ত্রের সাহায্যে উচ্চারিত ধ্বনির দ্বারা নিষ্পন্ন কোনো বিশেষ জনসমাজে ব্যবহৃত স্বতন্ত্রভাবে অবস্থিত তথা বাক্যে প্রযুক্ত শব্দসমষ্টিকে ভাষা বলে।)

(एतल्लक्षणानुसारेण भाषाः शब्दसमूहरूपाः , शब्दाश्च मनोभावप्रकाशकाः , वाग्यन्त्रोच्चारितध्वनिभिर्निष्पन्नाः, मनुष्यगोष्ठीविशेषे स्वतन्त्ररूपेणावस्थिताः तथा वाक्ये प्रयुक्ताः भवन्ति।)

विज्ञानशब्देनापि यद्यपि विशिष्टं ज्ञानमेव बोध्यं तथापि भाषाविज्ञानस्थितेन विज्ञानपदेन ततोऽप्यधिकं किञ्चिदवधेयम्। विशिष्टज्ञानस्य वैशिष्ट्यं व्याख्येयम्। वैशिष्ट्यं चात्र कार्यकारणभावाश्रितत्वं सूचयति। अत एव , तादृशमेव विशिष्टं ज्ञानं विज्ञानपदवाच्यं भवति यादृशं कार्यकारणभावसम्बन्धेन निर्मितं भवति। निरन्तरं यानि ज्ञानानि उत्पद्यन्ते तानि न श्रृङ्खलबद्धानि भवन्ति। किन्तु विज्ञानं विशेषविषयकं कार्यकारणसम्बन्धेन सुसंबद्धं सुनिश्चितं च भवति। अपि च विज्ञानं पर्यवेक्षणपरीक्षणादिभिः निरूपितं भवति।

अत एव, भाषाविषयकमुक्तस्वरूपं विशिष्टं ज्ञानमेव भाषाविज्ञानम्। भाषाविज्ञानेन सामान्यरूपेण भाषायाः विशेषतया च निर्दिष्टायाः कस्याश्चिद् भाषायाः प्रत्यवयवस्य सम्यक्प्रकारेण ज्ञानं भवति। तस्मात् येन शास्त्रेण भाषाविषयकं तादृशं विशिष्टं ज्ञानं भवति तदपि भाषाविज्ञानमित्युच्यते। आङ्गलभाषायां Linguistics – इति शब्देन भाषाविज्ञानमाख्यायते। अतः R. H. Robins – महोदयेनोक्तं - “General linguistics may be defined as the science of language”।

## भाषाविज्ञानस्य भेदाः

भाषाविज्ञानशास्त्रे न केवलं प्राचीनानां भाषाणां विश्लेषणमध्ययनं च भवति , आधुनिकानां भाषाणामपि समीक्षणं क्रियते। पुनश्च, सामान्यरूपेण भाषायाः अपि वैशिष्ट्यानि पर्यालोच्यन्ते। प्राचीनानां भाषाणां न केवलम् ऐतिहासिकपद्धत्या उद्भवः विवर्तनं वा निरूप्यते, अपि तु तौलनप्रक्रियया तासां परस्परं सम्बन्धः निर्णीयते। आधुनिकानां भाषाणां च कालविशेषावच्छेदेन ध्वनिगतं

रूपगतं वाक्यगतमर्थगतं च वैशिष्ट्यं निर्दिश्यते। साम्प्रतिककाले भाषायाः न केवलं निर्माणसर्वस्यता परिलक्ष्यते अपि तु रूपान्तरमूलकसृष्टिशीलत्वं विचार्यते। अत एव भाषाविज्ञानस्य बहवः भेदाः सम्भवन्ति। तेषां भेदचतुष्टयमिदानीमुल्लिख्यन्ते --

१. साधारणं भाषाविज्ञानम् (General Linguistics)

२. ऐतिहासिकं भाषाविज्ञानम् (Historical Linguistics)

३. तुलनामूलकं भाषाविज्ञानम् (Comparative Linguistics)

५. वर्णनामूलकं भाषाविज्ञानम् च (Descriptive Linguistics)

## वर्णनात्मकं भाषाविज्ञानम्

चतुर्विधेषु मुख्येषु भाषाविज्ञानभेदेषु अन्यतमं वर्णनात्मकं भाषाविज्ञानम्। एवंविधस्य भाषाविज्ञानस्य वैशिष्ट्यम् इदमेव भवति यत् अत्र भाषाविशेषस्य कालविशेषे परिदृष्टं स्वरूपं विचार्यते। इदानीन्तनकाले या भाषा देशविशेषे सततं व्यवह्रियते तस्या रूपाणि तद्देशविशेषान्तर्गतेषु विभिन्नेषु स्थानेषु वाग् -व्यवहारभेदाद् विभिन्नानि भवन्ति। तेषां रूपाणां विश्लेषणं सम्भवति वर्णनात्मकभाषाविज्ञानरीत्यनुसारेणैव पुरवानुपुंखरूपेण विश्लेषणं कृत्वा ध्वनिगतो भेदः, रूपगतो भदेः, वाक्यगतो भेदः अर्थगतः भेदश्च निरूप्यते, भेदकारणञ्चावधार्यते। ग्रीकलातिनसंस्कृतादिभाषाणां प्राचीनत्वेऽपि तत्तद्भाषाभिः विरचितस्य साहित्यस्य विद्यमानत्वात्, तासामपि वर्णनात्मकं विवेचनं भवति। वर्णनात्मक-भाषाविज्ञाने भाषाविशेषस्योद्भवः विवर्तनं वा न विचार्यविषयो भवति, नापि च भाषान्तरैः सह भाषाविशेषस् तुलनात्मकम् अध्ययनं सम्भवति वर्णनात्मकभाषाविज्ञाने। पाणिनीयव्याकरणं तु वर्णनात्मकभाषाविज्ञानशास्त्रमेव। वस्तुतः पाणिनीयं व्याकरणं वर्णनात्मकभाषाविज्ञानविषयकः सर्वोत्तमो ग्रन्थः। तथा चोक्तं - “Sanskrit laid the foundation of comparative philology as well as of descriptive linguistics, first descriptive grammar of a language being the Sanskrit Grammar of Panini”.

### वर्णनात्मकभाषाविज्ञानस्य कानिचन मुख्यानि वैशिष्ट्यानि

वर्णनामूलकभाषाविज्ञानम् ऐतिहासिकभाषाविज्ञानात् तुलनामूलकभाषाविज्ञानात् साधारणभाषाविज्ञानात् च भिन्नम्। अत एव तस्य भेदकानि वैशिष्ट्यानि अवश्यमेव सन्ति। तेषां कानिचन उल्लिख्यन्ते -

१. वर्णनात्मकभाषाविज्ञाने सामान्यरूपेण भाषाविषयकमालोचनं न भवति। किन्तु विशेषरूपेण भाषाविशेषस्य उपभाषादीनां स्वरूपम् अवधार्यते। चर्मकारादिसम्प्रदायविशेषस्यापि वाग्व्यवहारस्य वैशिष्ट्यं निरूप्यते।

२. वर्णनात्मकभाषाविज्ञानं यद्यपि साधारणभाषाविज्ञानस्याङ्गभूतं तथापि तदेवाधारीकृत्य ऐतिहासिकभाषाविज्ञानं तुलनामूलकभाषाविज्ञानं च प्रतिष्ठां लभते।

३. वर्णनात्मकभाषाविज्ञानमित्यभिधानात् स्पष्टं भवति यत् अत्र भाषायाः व्यवह्रियमाणस्य स्वरूपस्य वर्णनं विश्लेषणं च भवति। अतः व्याकरणस्य यद्यपि वर्णनामूलकत्वं सिद्धं तथापि वर्णानात्मकभाषाविज्ञानं व्याकरणात् भिन्नमेव। व्याकरणस्य

विधिनिषेषपरत्वात् प्रयोगाणां शुद्ध्यशुद्धिविचारः अत्र क्रियते। किन्तु वर्णनात्मकभाषाविज्ञानस्य प्रचलितप्रयोगविश्लेषकत्वात् अशुद्धं किमपि नात्र भवति।

४. व्याकरणे गेम्- इत्यस्य धातुत्वं सिद्धम्। अतः गम्-धातोः नानाविधप्रत्ययानां योगेन गमनं, गच्छति ,अगमत्, अगच्छत् इत्यादीनि रूपाणि भवन्ति। किन्तु पद्धतिभेदात् वर्णनामूलकभाषाविज्ञाने यथादृष्टानाम् एव प्रयोगाणां विचार्यत्वात् गम् -धातुः गच्छ-धातुश्च स्वीकृतः।

५. भाषायाः उच्चार्यत्वं श्रवणीयत्वम् अर्थबोधकत्वञ्चाङ्गीकृतम्। वर्णनात्मकभाषाविज्ञाने भाषायाः उच्चार्यत्वमभिलक्ष्य अवयववादस्य पदनिर्माणसर्वस्यतावादस्य वा प्राधान्यं दरीदृश्यते।

**संस्कृतभाषातत्त्वे अक्षराणि (Diacritics)**

अ – a, आ - ā, इ- i, ई- ī, उ- u, ऊ- ū, ऋ- ṛ, ॠ -ṝ, ऌ- ḷ, ॡ ḹ,

ए- e, ऐ- ai, ओ- o, औ au,

क-k, ख-kh, ग- g, घ- gh, ङ- ṅ,

च- c, छ- ch, ज- j, झ- jh, ञ – ñ

ट-ṭ, ठ- ṭh, ड- ḍ, ढ- ḍh, ण- ṇ,

त- t, थ- th, द- d, ध- dh, न – n

प-p, फ- ph, ब- b, भ- bh, म- m

य- y, र- r, ल- l, व- v, श- ś, ष- ṣ, स – s, ह- h, ः - ḥ, ं ṃ

**संस्कृतभाषायां ध्वनिव्यवस्था -**

<u>स्वरध्वनयः</u> -

ह्रस्वस्वरध्वनयः- a, i, u, ṛ, ḷ

दीर्घस्वरध्वनयः - ā, ī, ū, ṝ, ḹ, e, o

द्विस्वरध्वनी - ai, au

<u>स्वरध्वनयः</u> -

१. एकस्वरध्वनयः - ह्रस्वाः - a, i, u दीर्घाः ā, ī, ū

२. एकस्वरीभूतौ दीर्घौ द्विस्वरध्वनी - e, o

३. दीर्घौ द्विस्वरध्वनी - ai, au

४. अर्धव्यञ्जनतरलध्वनयः - ह्रस्वौ ṛ, ḷ दीर्घौ - ṝ, ḹ

<u>व्यञ्जनध्वनयः</u> -

अ) स्पृष्टध्वनयः- क) कण्ठ्यध्वनयः - k, kh, g, gh, ṅ

ख) तालव्यध्वनयः - c, ch, j, jh, ñ

ग) मूर्धन्यध्वनयः - ṭ, ṭh, ḍ, ḍh, ṇ

घ) दन्त्यध्वनयः - t, th, d, dh, n

ङ) ओष्ठ्यध्वनयः - p, ph, b, bh, m

आ) अर्धस्वरध्वनयः - y, v, r, l

इ) ऊष्मध्वनयः - (संघर्षध्वनयः - क) शिस्-ध्वनयः - ś, ṣ, s)

ख) शुद्धमहाप्राणध्वनयः - h

ग) अघोषा ऊष्माणः ḥ, ẖ, (जिह्वामूलीयः) ḫ (उपध्मानीयः)

ई) शुद्धानुनासिकः - ṃ

**भारोपीयभाषासु समार्थकशब्दानां प्रतिरूपान्तराणि**

**१. पितृवाचकाः शब्दाः**

प्रा.भा.आ. - pitā

आवेस्तीय – pitā

प्रा. पारसिक – pitā

ग्रीक – patēr

लातिन – patēr

गथिक – fadar

आङ्गलम् - father

< * pətēr

**२. मातृवाचकाः शब्दाः**

प्रा.भा.आ. - mātā

प्रा.पा. - mātā

ग्रीक - mātēr

लातिन- māter

प्रा.उ.जा. - mouter

आङ्गलम् - mother

< * mātēr

**३. भ्रातृवाचकाः शब्दाः**

प्रा.भा.आ.- bhrātā

आवे - brātā

प्रा. पा. - brātā

ग्रीक – phrātēr

लातिन – frātēr

गथिक - brōpar (p - थ)

आङ्गल - brother

< * bhrātēr

**४. दुहितृवाचकाः शब्दाः**

प्रा.भा.आ. - duhitā

ग्रीक – thugatēr

गथिक – dauhter

आङ्गल – daughter

लिथुइ - dukte

< * daug͡hətēr

**५. अस्मद्वाचकाः शब्दाः**

प्रा.भा.आ. - aham

आवे - azəm

प्रा.पा- adam

ग्रीक – agōn

लातिन- ego

गथिक - ik

आङ्गल - I

< * eg͡hom

**६. युष्मद्वाचकाः शब्दाः**

प्रा.भा.आ. - Tvam

दोरिक ग्रीक - tu

लातिन - tu

गथिक - þu (थु)

आङ्गल - thou

आर्मेनीय - du

< * tu̯am

**७. संख्यावाचकाः शब्दाः - शतम्**

प्रा.भा.आ. - Śatam

आवे – Satəm (ə-অএর অর্ধেক উচ্চারণ)

प्रा.पा - *θ*ata-gus (থটগুস)

लातिन – Centum

गथिक – Xund [(k) hund]

ग्रीक - he-katon

आङ्गल – Hundred

< * K̂ṃtom

**८. दश**

प्रा.भा.आ. -daśa

आवे - dasa

ग्रीक - deka

आधुनिक पारसिक – dah

लातिन – decem

गथिक -tai-hum

आङ्गल - ten

< * dek̂ṃ

**९. सप्त**

प्रा.भा.आ. - Sapta

ग्रीक - hepta

लातिन – Septem

गथिक – siban (sibun)

आङ्गल – Seven

< * septṃ/ṇ

**१०. पञ्च**

प्रा.भा.आ. - Pañca

ग्रीक - Pente

लातिन - quinque

गथिक – finf

प्रा. उच्च. जार्मान – finf

आङ्गल - five

< * penqu̯e

**११. द्वौ**

प्रा.भा.आ. - dvā (वैदिक) dvau (लौ)

ग्रीक - du(w)ō

लातिन -duo

गथिक - twai

आङ्गल - two

< * du̯ō

**१२. एक**

प्रा.भा.आ. - e-ka

आवे - ac̄vō

प्रा.पा - avivam

ग्रीक (होमारि) - aîos (Alone)

आङ्गल - one (a, an, alone )

< * oiu̯os

**१३. त्रि**

प्रा.भा.आ. - trayas

ग्रीक – treīs

लातिन – tres

गथिक – þreis

आङ्गल - three

< * trei̯es

**१४. पद**

प्रा.भा.आ. -pada

ग्रीक - poda

लातिन - pedem

गथिक – fotus

आङ्गल -foot

< * pe(o)d

**१५. दन्त**

प्रा.भा.आ. - danta

ग्रीक – odōn

लातिन – dēns

आङ्गल – tooth

< * de(o)nt

**१६. वृकः**

प्रा.भा.आ. - vṛkaḥ

ग्रीक – lukos

लातिन – lupus

गथिक -Wulfs

आङ्गल -Wolf

< * u̯l̥qu̯os

**१७. जन**

प्रा.भा.आ. - janaḥ

आवे - Zanō

ग्रीक -genos

लातिन – genus

गथिक - kūni

आङ्गल – Kin

< * ĝenos

**१८. मधु**

प्रा.भा.आ. - madhu

ग्रीक - methu

लातिन – medius

गथिक – midjis

आङ्गल – mead

< * medhu

१८. अस्ति

प्रा.भा.आ- asti

प्रा. पारसिक – astiy

ग्रीक - esti

लातिन – est

गाथिक – ist

आङ्गल – is

< * esti

## इन्दो-युरोपीयभाषायां ध्वनिव्यवस्था

१. एकस्वरध्वनयः (Monophthongs)

(Short) ह्रस्वाः - * a, e, o, i, u (*ă, ĕ, ŏ, ĭ, ŭ )

(Long) दीर्घाः - *ā, ē, ō, ī, ū

(Extra Short) अतिह्रस्वः अध्वनिः - *ə

२. द्विस्वरध्वनयः (Diphthongs)

(Short) ह्रस्वाः - *ai, ei, oi, au, eu, ou

(Long) दीर्घाः - * āi, ēi, ōi, āu, ēu, ōu

(Weak) क्षीणौ - *əi, əu

३. तरलार्धव्यञ्जनध्वनयः (Sonantliquid)

(Short) ह्रस्वौ - *ṛ, ḷ

(Long) दीर्घौ - ṝ, ḹ

४. अनुनासिकार्धव्यञ्जनध्वनयः (Sonant nasals)

(Short) ह्रस्वौ - * ṃ, ṇ

(Long) दीर्घौ - ṃ̄, ṇ̄

### मन्तव्यानि -

१. e-ध्वनेः, o-ध्वनेश्च ह्रस्वदीर्घभेदौ इन्दो-युरोपीयभाषायां कल्पितौ। संस्कृते तु दीर्घ-e-ध्वनिः, दीर्घ-o-ध्वनिश्च विद्यते।

२. अतिह्रस्वस्य अ-ध्वनेः (ə) निरपेक्षस्वरत्वम् अङ्गीकृतम्।

३.ĕi- ध्वनेः, ŏi - ध्वनेः , ĕu -ध्वनेः , ŏu – ध्वनेश्च विलोपः संस्कृतभाषायां जातः।

४. संस्कृतभाषायाम् अनुनासिकार्धव्यञ्जनानां लोपः सञ्जातः।

५. इन्दो-युरोपीयभाषायाः ह्रस्वस्य *e-ध्वनेः, o-ध्वनेश्च संस्कृते a-ध्वनौ परिवर्तनं सञ्जातम्।

६. *ē-ध्वनेः, ō - ध्वनेश्च संस्कृते ā-ध्वनौ परिवर्तनं सञ्जातम्।

७. निरपेक्षस्वरध्वनिः संस्कृते i-ध्वनौ रूपान्तरितः।

## इन्दो-युरोपीयभाषायां व्यञ्जनध्वनयः -

अ) स्पृष्टा ध्वनयः (Stops/ Mutes/ Plosives)

क) कण्ठ्यध्वनयः (Gutturals)

१) पुरःकण्ठ्याः/तालव्याः (Palatals) - *k̑, *k̑h, *g̑, *g̑h, * ñ̄

२) पश्चात्कण्ठ्याः/ शुद्धाः कण्ठ्याः (Velars) - *q, *qh, *g, *gh, * ṅ

३) कण्ठौष्ठ्याः (Latro-velars) *qu̯, *qu̯h, *gu̯, *gu̯h, *ṅu̯

(*qw, * qwh, *gw, *gwh, *ṅw)

ख) दन्त्याः ध्वनयः - * t, *th, *d, *dh, *n

ग) ओष्ठ्या ध्वनयः - *p, *ph, *b, *bh, *m

आ) अर्धस्वरध्वनी (Semi-vowels) *(y) i̯, * (v) u̯

इ) तरलध्वनी (Liquid)

१. कम्पितध्वनिः - *r (trilled)

२. पार्श्विकध्वनिः - *l (lateral)

ई) ऊष्मध्वनयः/ संघर्षध्वनयः/ अनवरुद्धध्वनयः (Sibilants/ spirants/ fricatives)

१. कण्ठ्या ऊष्मा ध्वनयः - *x (উচ্চারণ - q+s), *४ (g+s), *f (ph+s), *v (b+s)

२. दन्त्या ऊष्मा ध्वनयः - s (স), z (জ+স), ***θ*** (থ+স), *δ*

## इन्दो-युरोपीयध्वनीनां वैशिष्ट्यानि

इन्दो-युरोपीयभाषायां तौलनप्रक्रियया ऐतिहासिकपद्धत्या च अनुमितानां ध्वनीनां वैशिष्ट्यानि संक्षेपेण उल्लिख्यन्ते।

१. इन्दो-युरोपीयभाषायाः ह्रस्वा *a, e, o इत्येते ध्वनयः इन्दो-इराणीयशाखायाम् (आर्यशाखायाम्) a-(अ) ध्वनित्वेन परिणताः। इ.यु. * ā, ē, ō – इत्येते दीर्घाः ध्वनयः आर्यशाखायाम् आ (ā) – ध्वनित्वेन विपरिणताः। शाखान्तरेषु तु ते अपरिवर्तिताः स्थिताः।

२. *i, ī, u, ū – इत्येते ध्वनयस्तु सर्वास्वेव शाखासु प्रायः अपरिवर्तिताः सन्ति।

३. *ə (sehwa) इति अतिह्रस्वः a-ध्वनिः कुत्रापि न दृश्यते। ध्वनिरयम् इन्दो-इराणीयशाखायाम् i-ध्वनिरूपेण कुत्रचिच्च a-ध्वनिरूपेण परिणतः।

४. *ḷ, * ṛ – इति ध्वनिद्वयं कुत्रापि न लक्षितम्। किन्तु *ḷ – ध्वनिः आर्यशाखायां ṛ-ध्वनौ परिणतः। आर्यशाखातः अन्यत्र *ṝ, *ḹ इति ध्वनिद्वयं *ṛ, *ḷ – इति ध्वनिद्वये मिश्रितं जातम्।

५. इन्दो-युरौपीय *m̥̆, *n̥̆ इति ध्वनिचतुष्टयं कुत्रापि न लक्षितम्। आर्यशाखायां ग्रीकशाखायां च तेषां a, ā इति ध्वनिद्वये विपरिणतिर्जाता।

६. इ.यु भाषायां ह्रस्वदीर्घभेदेन यौगिकस्वरध्वनयः द्विधा विभक्ता आसन्। ग्रीकभाषायां यद्यपि इमे रक्षिताः , संस्कृतभाषायां तु ह्रस्वानां *ai, ei, oi, इत्येतेषां e-ध्वनौ, दीर्घाणां *āi, *ēi, *ōi इत्येतेषां āi – ध्वनौ, ह्रस्वानां au, eu, ou -इत्येतेषां o-ध्वनौ, दीर्घाणां *āu, ēu, ōu इत्येतेषां āu-ध्वनौ परिवर्तनं जातम्।

७. इ.यु. *y, v, r. l इत्येतेषाम् अन्तःस्थानां मध्ये y, v – इति ध्वनिद्वयं प्रायः सर्वासु शाखासु विद्यते। ग्रीकशाखायां प्रायः लोपो जातः। *r, *l इत्यनयोः संरक्षणं सर्वासु शाखासु दृश्यते। आर्यशाखायां l-ध्वनेः r-ध्वनौ परिवर्तनं जातम्।

८. स्पृष्टानां कण्ठ्यध्वनीनां परिवर्तनं बहुधा सम्भूतं -

क) इ.युतभाषायां कण्ठ्यध्वनीनां (k-वर्गीयाणाम्) प्रकारत्रयं कल्पितम्। पुरःकण्ठ्यध्वनयः , ग्रीक-लातिन-जार्मानिक-केल्टिक-दोखारिय-हिट्टीयशाखासु पश्चात्कण्ठ्यध्वनिभिः सह एकीभूता जाताः। इन्दोइराणीय -वाल्टोस्लाविक-आल्वानीय-आर्मेनीयशाखासु किन्तु *k̑ - ध्वनिः Ś-ध्वनौ S-ध्वनौ वा रूपान्तरं प्राप्तः। अन्येषां पुरःकण्ठ्यध्वनीनां परिवर्तनं प्रायशः तालव्यध्वनिषु पश्चात्कण्ठ्यध्वनिषु वा जातम्।

ख) पश्चात्कण्ठ्यध्वनीनां संरक्षणं सर्वास्वेव शाखासु संघटितम्।

ग) कण्ठ्यौष्ठ्यध्वनयस्तु ग्रीक -लातिन-जार्मानिकादिषु युरोपीयशाखासु स्वातन्त्र्यं रक्षितवन्तः। अन्यत्र पश्चात्कण्ठ्यध्वनिभिः सह मिश्रिताः जाताः।

९. इन्दो-युरोपीयदन्त्यध्वनीनाम् औष्ठ्यध्वनीनां च संरक्षणं सर्वत्र दृश्यते।

१०. ऊष्मध्वनीनां मध्ये s-ध्वनिरेव मुख्यः। अयं तु ध्वनिः सर्वासु शाखासु विद्यते। ग्रीकशाखायाम् इराणीयशाखायां च क्वचित् *s-ध्वनिः h-ध्वनौ विपरिणतः अभवत्।

११. इ.यु.भाषायां मूर्धन्यध्वनयः टादयः नासन्।

१२. इ.यु.भाषायां तालव्यध्वनयः चादयो नासन्।

## इन्दो-युरोपीयध्वनीनां प्राचीनभारतीयार्यभाषायां परिवर्तनमपरिवर्तनं वा

इ.यु. * a > प्रा. भा. आ. a

इ.यु. * e > प्रा. भा. आ. a

इ.यु. * o > प्रा. भा. आ. a

इ.यु. * i > प्रा. भा. आ. i

इ.यु. * u > प्रा. भा. आ. u

इ.यु. * ā > प्रा. भा. आ. ā

इ.यु. * ē > प्रा. भा. आ. ā

इ.यु. * ō > प्रा. भा. आ. ā

इ.यु. * ī > प्रा. भा. आ. ī

इ.यु. * ū > प्रा. भा. आ. ū

इ.यु. * ə > प्रा. भा. आ. i

इ.यु. * ai > प्रा. भा. आ. e

इ.यु. * ei > प्रा. भा. आ. e

इ.यु. * oi > प्रा. भा. आ. E

इ.यु. * au > प्रा. भा. आ. o

इ.यु. * eu > प्रा. भा. आ. o

इ.यु. * ou > प्रा. भा. आ. o

इ.यु. * āi > प्रा. भा. आ. āi

इ.यु. * ēi > प्रा. भा. आ. āi

इ.यु. *ōi > प्रा. भा. आ. āi

इ.यु. * āu > प्रा. भा. आ. āu

इ.यु. * ēu > प्रा. भा. आ. āu

इ.यु. * ōu > प्रा. भा. आ. āu

इ.यु. * əu > प्रा. भा. आ. ī

इ.यु. * əu > प्रा. भा. आ. ū

इ.यु. * ṛ (व्यञ्जनात् प्राक्) > प्रा. भा. आ. ṛ

इ.यु. * ṛ (स्वरात् प्राक्) > प्रा. भा. आ. ir/ur

इ.यु. * ḷ (व्यञ्जनात् प्राक्) > प्रा. भा. आ. ṛ

इ.यु. * ḷ (स्वरात् प्राक्) > प्रा. भा. आ. ir/ ur

इ.यु. * ṝ > प्रा. भा. आ. īr/ ūr

इ.यु. * ḹ > प्रा. भा. आ. īr/ ūr

इ.यु. * ṇ (व्यञ्जनात् प्राक्) > प्रा. भा. आ. a

इ.यु. * ṇ (स्वरात् प्राक्) > प्रा. भा. आ. an

इ.यु. * ṃ (व्यञ्जनात् प्राक्)> प्रा. भा. आ. a

इ.यु. * ṃ (व्यञ्जनात् प्राक्)> प्रा. भा. आ. Am

इ.यु. * ṇ̄ > प्रा. भा. आ. ā

इ.यु. * ṃ̄ > प्रा. भा. आ. ā

इ.यु. *k̑ > प्रा. भा. आ. Ś

इ.यु. *k̑h> प्रा. भा. आ. Ch

इ.यु. *g̑ > प्रा. भा. आ. J

इ.यु. *g̑h > प्रा. भा. आ. (jh) - h

इ.यु. *q > प्रा. भा. आ. k

इ.यु. *qh > प्रा. भा. आ. kh

इ.यु. *g > प्रा. भा. आ. g

इ.यु. *gh > प्रा. भा. आ. gh

इ.यु. *qu̯ > प्रा. भा. आ. k

इ.यु. *qu̯h > प्रा. भा. आ. Kh

इ.यु. *gu̯ > प्रा. भा. आ. g

इ.यु. *gu̯h > प्रा. भा. आ. Gh

इ.यु. * q+ i/e/i̯ > प्रा. भा. आ. C+

इ.यु. * qh+ i/e/i̯ > प्रा. भा. आ. Ch+

इ.यु. * g+ i/e/i̯ > प्रा. भा. आ. j+

इ.यु. * gh+ i/e/i̯ > प्रा. भा. आ. jh> h+

इ.यु. * qu̯+ i/e/i̯ > प्रा. भा. आ. C+

इ.यु. * qu̯h+ i/e/i̯ > प्रा. भा. आ. Ch+

इ.यु. * gu̯+ i/e/i̯ > प्रा. भा. आ. j+

इ.यु. * gu̯h+ i/e/i̯ > प्रा. भा. आ. jh> h+

इ.यु. *t > प्रा. भा. आ. t

इ.यु. *th > प्रा. भा. आ. th

इ.यु. *d > प्रा. भा. आ. d

इ.यु. *dh > प्रा. भा. आ. dh

इ.यु. *n > प्रा. भा. आ. n

इ.यु. *p > प्रा. भा. आ. p

इ.यु. *ph > प्रा. भा. आ. ph

इ.यु. *b > प्रा. भा. आ. b

इ.यु. *bh > प्रा. भा. आ. bh

इ.यु. *m > प्रा. भा. आ. m

इ.यु. *i̯ > प्रा. भा. आ. y

इ.यु. *u̯ > प्रा. भा. आ. v

इ.यु. *r > प्रा. भा. आ. R

इ.यु. *l > प्रा. भा. आ. l, r

इ.यु. *s > प्रा. भा. आ. S

## प्राचीनभारतीयार्यभाषाया ध्वनीनाम् इन्दो-युरोपीयं मूलम्

१. प्रा.भा.आ a-ध्वनेः इ.यु.मूलम् तु *a-ध्वनिः, *e-ध्वनिः, *o-ध्वनिः, ṇ-ध्वनिः, ṃ-ध्वनिर्वा भवितुमर्हति। यतो हि -

इ.यु. *a, *e, *o, *ṇ, *ṃ > प्रा. भा. आ. a

अर्थात् इ.यु. * a > प्रा. भा. आ. a; यथा, इ.यु *apo > प्रा.भा.आ. apa, ग्रीक apo इत्यादि।

इ.यु. * e > प्रा. भा. आ. a; यथा, इ.यु *esti > प्रा.भा.आ. asti, ग्रीक esti इत्यादि।

इ.यु. * o > प्रा. भा. आ. a; यथा, इ.यु *aĝros > प्रा.भा.आ. ajrar, ग्रीक agros इत्यादि।

इ.यु. * ṇ > प्रा. भा. आ. a; यथा, इ.यु *Septṇ > प्रा.भा.आ. *sapta, ग्रीक hepta इत्यादि।

इ.यु. * ṃ > प्रा. भा. आ. a; यथा, इ.यु *k̂ṃtom > प्रा.भा.आ. Satam, ग्रीक he-katon इत्यादि।

२. प्रा.भा.आ. ā-ध्वनेः इ.यु. मूलं तावत् * ā-ध्वनिः, ē-ध्वनिः, ō-ध्वनिः, ṇ-ध्वनिः, ṃ-ध्वनिर्वा भवितुमर्हति। यतो हि -

इ.यु. *ā, *ē, * ō, * ṇ̄, *ṃ̄ > प्रा. भा. आ. ā.

अर्थात्, इ.यु. * ā> प्रा. भा. आ. ā; यथा, इ.यु. *māter > प्रा.भा.आ. mātā, ग्रीक mātēr इत्यादि।

इ.यु. * ē > प्रा. भा. आ. ā; यथा, इ.यु *edhēt > प्रा.भा.आ. adhāt, ग्रीक ethi-ken इत्यादि।

इ.यु. * ō > प्रा. भा. आ. ā; यथा, इ.यु *neptōs > प्रा.भा.आ. naptā, ग्रीक neptos इत्यादि।

इ.यु. * ṇ̄ > प्रा. भा. आ. ā; यथा, इ.यु *e-ĝṇ̄-nāt > प्रा.भा.आ. *ajana, ग्रीक noscet इत्यादि।

इ.यु. * ṃ̄ > प्रा. भा. आ. ā; यथा, इ.यु *gh̯ṃ̄tu > प्रा.भा.आ. gāta, ग्रीक gateu इत्यादि।

३. प्रा.भा.आ.- i – ध्वनेः इ.यु.मूलम् *i-ध्वनिः, *ə-ध्वनिर्वा भवितुमर्हति। यतो हि - इ.यु. * i, * ə > प्रा.भा.आ. i

अर्थात्, इ.यु. * i > प्रा. भा. आ. i; यथा, इ.यु *peri > प्रा.भा.आ. pari, ग्रीक peri इत्यादि।

इ.यु. * ə > प्रा. भा. आ. i; यथा, इ.यु *pətēr > प्रा.भा.आ. pitā, ग्रीक patēr इत्यादि।

४. प्रा.भा.आ. ī-ध्वनिः इ.यु. *ī-ध्वनिरेव भवति। यतो हि इ.यु. *ī > प्रा.भा.आ. ī

अर्थात्, इ.यु. * ī > प्रा. भा. आ. ī; यथा, इ.यु *u̯īros > प्रा.भा.आ. vīras

५. प्रा.भा.आ. u-ध्वनिः इ.यु. *u-ध्वनिरेव भवति। यतो हि इ.यु. *u > प्रा.भा.आ. u

अर्थात्, इ.यु. * u > प्रा. भा. आ. u; यथा, इ.यु *medhu > प्रा.भा.आ. madhu, ग्रीक methus

६. प्रा.भा.आ. ū-ध्वनिः इ.यु.मूलं *ū-ध्वनिरेव भवति। यतो हि इ.यु. *ū > प्रा.भा.आ. ū

अर्थात्, इ.यु. * ū > प्रा. भा. आ. ū; यथा, इ.यु *dhūmos > प्रा.भा.आ. dhūmas, ग्रीक thumos, ला. fūmus

७. प्रा.भा.आ. ṛ-ध्वनेः इ.यु.मूलं *ṛ-ध्वनिः, *ḷ- ध्वनिर्वा भवति। यतो हि इ.यु. *ṛ, *ḷ > प्रा.भा.आ. ṛ

अर्थात्, इ.यु. * ṛ> प्रा. भा. आ. ṛ; यथा, इ.यु *mṛtos > प्रा.भा.आ. mṛtas, ग्रीक ambrotos

इ.यु. * ḷ> प्रा. भा. आ. ṛ; यथा, इ.यु *u̯ḷqu̯os > प्रा.भा.आ. vṛkas, ग्रीक lukos, ला. lupus

८. प्रा.भा.आ. ḷ-ध्वनेः इ.यु.मूलं तु इ.यु. *ḷ-ध्वनिः भवितुं नार्हति। इ.यु. *ḷ -ध्वनेरपि प्रा.भा.आ-भाषायाम् परिणतिः ṛ-ध्वनौ एव भवति। अतएव प्रा.भा.आ ḷ-ध्वनिस्तावत् नूतनं संयोजनम्।

९. प्रा.भा.आ. ṝ-ध्वनिः इ.यु. ṝ-ध्वनिरेव न भवितुमर्हति। यतो हि इ.यु. *ṝ > प्रा.भा.आ. īr/ ūr भवति।

१०. प्रा.भा.आ-भाषायाम् ḹ-ध्वनेरपि व्यवहारो नास्ति।

११. प्रा.भा.आ e-ध्वनेः इ.यु.मूलं तु *ai, *ei, *oi वा भवति। यतो हि इ.यु. *ai, *ei, *oi > प्रा.भा.आ. e

यथा - इ.यु. *bheudhe-tai > प्रा.भा.आ. bodhete, ग्री. peuthoma

इ.यु. *eiti > प्रा.भा.आ. eti , ग्री. eiti

इ.यु. *u̯olda > प्रा.भा.आ. veda, ग्री. oida, ग. wit

१२. प्रा.भा.आ. āi-ध्वनिः इ.यु. *āi-ध्वनेः, *ēi-ध्वनेः, ōi-ध्वनेर्वा परिणामः। यतो हि इ .यु. *āi, * ōi, * ēi > प्रा.भा.आ. āi

अर्थात् इ.यु *āi > प्रा.भा.आ. āi; यथा, इ.यु. *ai > प्रा.भा.आ. Senāyāi , ग्री. the āi

यथा, इ.यु. *elēiqsam > प्रा.भा.आ. araikṣam, ग्री. elēksam

यथा, इ.यु. *u̯ḷqu̯oi > प्रा.भा.आ. Vṛkāya , ग्री. lukoi

१३. प्रा.भा.आ o-ध्वनिः इ.यु *au-ध्वनेः, *eu-ध्वनेः, *ou-ध्वनेर्वा आगतः। यतो हि इ .यु. *au, *eu. *ou> प्रा.भा.आ. o। अर्थात् - इ.यु. *au > प्रा.भा.आ. o; यथा, इ.यु. *auĝes > प्रा.भा.आ. ojas , ग्री. auges

इ.यु. *eu > प्रा.भा.आ. o; यथा, इ.यु. *bheudhetai > प्रा.भा.आ. bodhate

इ.यु. *ou > प्रा.भा.आ. o; यथा, इ.यु. *gu̯ou > प्रा.भा.आ. go

१४. प्रा.भा.आ. āu-ध्वनिः इ.यु. *āu-ध्वनेः, *ēu-ध्वनेः, *ōu-ध्वनेश्च आगतः। यतो हि - इ.यु. *āu, *ēu, *ōu > प्रा.भा.आ āu। अर्थात् इ.यु. *āu > प्रा.भा.आ. āu; यथा - इ.यु. *nāus > प्रा.भा.आ nāus, ग्री nāus

इ.यु. इ.यु. *ēu > प्रा.भा.आ āu, यथा इ.यु. *di̯ēus > प्रा.भा.आ dyāus, ग्री. Zeus

इ.यु. *ōu > प्रा.भा.आ āu, यथा, इ.यु. *gu̯ōus > प्रा.भा.आ gāus, ग्री. bōus

१५. प्रा.भा.आ k-ध्वनिः इ.यु *q-ध्वनेः, *qu̯-ध्वनेर्वा आगतः। यतो हि इ.यु. *q, *qu̯ > प्रा.भा.आ. k;

अर्थात् इ.यु. *q > प्रा.भा.आ k, यथा, इ.यु. *ququd > प्रा.भा.आ kakud, ला. caoumen

इ.यु. *qu̯ > प्रा.भा.आ. k; यथा, इ.यु.*u̯ḷqu̯os > प्रा.भा.आ. vṛkas; ग्री. lukos, ला. lupus

१६. प्रा.भा.आ. kh-ध्वनिः, इ.यु *qh-ध्वनेः, *qu̯h – ध्वनेर्वा आगतः। यतो हि इ.यु. *qh, *qu̯h > प्रा.भा.आ. *kh

१७. प्रा.भा.आ. g-ध्वनिः, इ.यु *g-ध्वनेः, *gu̯ – ध्वनेर्वा आगतः। यतो हि इ.यु. *g, *gu̯> प्रा.भा.आ. *g

१८. प्रा.भा.आ. gh-ध्वनिः, इ.यु *gh-ध्वनेः, *gu̯h – ध्वनेर्वा आगतः। यतो हि इ.यु. *gh, *gu̯h > प्रा.भा.आ. *gh

१९. प्रा.भा.आ. ṅ-ध्वनिः, इ.यु *ṅ-ध्वनिरेव। यतो हि इ.यु. *ṅ > प्रा.भा.आ. *ṅ

२०. प्रा.भा.आ. c-ध्वनिः, इ.यु *q-ध्वनेः, *qu̯ – ध्वनेर्वा आगतः; यदि तालव्यस्वराणामनुगमनं सिद्धम्। यतो हि इ.यु. *q, *qu̯+ तालव्यस्वराः (i, e, i̯) > प्रा.भा.आ. *c + (i, e, i̯ )

२१. प्रा.भा.आ. ch-ध्वनेरुत्पत्तिः संशयाच्छन्ना।

२२. प्रा.भा.आ. j-ध्वनिः इ.यु. *ĝ, *g, *gu̯ - इत्येतेभ्यः ध्वनिभ्यः आगतः। यदि * g-ध्वनिम्, * gu̯-ध्वनिं वा तालव्यस्वराणाम् (i, e, i̯ ) कश्चित् अनुगच्छति, तर्हि एव j-ध्वनिरुत्पद्यते।

अर्थात् इ.यु. *ĝ > प्रा.भा.आ. * j

इ.यु. *g/gu̯ + तालव्यस्वरः > प्रा.भा.आ. * j

२३. प्रा.भा.आ. jh-ध्वनिः (यस्मात् पुनः ह-ध्वनिरुत्पन्नः सः) इ.यु. *gh/ *gu̯h इत्यतः आगतः, यदि तालव्यस्वराणां केनचित् अनुसरणं भवेत्। यतो हि- इ.यु. *gh/ *gu̯h + तालव्यस्वरः > प्रा.भा.आ. * jh>h

२४. प्रा.भा.आ ñ इ.यु. * ñ ध्वनेरेव आगतः। अत्र तालव्यस्वरस्यानुगमनमग्रे गमनं वा आवश्यकम्।

२५- २९. प्रा.भा.आ. ṭ, ṭh, ḍ, ḍh, ṇ -इत्येते ध्वनयः इ.यु.भाषायां न सन्ति। ष-ध्वनियोगे मूर्धनीभवनसूत्रबलेन दन्त्या ध्वनयः मूर्धन्याः ध्वनयः सञ्जाताः।

३०- ३४. प्रा.भा.आ. t, th, d, dh, n -इत्येते ध्वनयः इ.यु. * t, th, d, dh, n इत्येतेभ्यः ध्वनिभ्यः एव आगतः।

३५- ३९. प्रा.भा.आ. p, ph, b, dh, m इत्येतेषां ध्वनीनां मूलम् इ.यु. *p, *ph, *b, *bh, *m -इत्येते ध्वनय एव।

४०. प्रा.भा.आ. y-ध्वनिः इ.यु * i̯-ध्वनेरेव आगतः।

४१. प्रा.भा.आ. r-ध्वनिः इ.यु *r, *l- इत्येताभ्यां ध्वनिभ्यामागतः।

४२. प्रा.भा.आ. l-ध्वनेः मूलं इ.यु *l -ध्वनिरेव।

४३. प्रा.भा.आ. v-ध्वनिः इ.यु * u̯-ध्वनेरेव आगतः।

४४. प्रा.भा.आ. ś-ध्वनिः इ.यु * k̑-ध्वनेरेव आगतः।

४५. प्रा.भा.आ. ś-ध्वनिः इ.यु * s-ध्वनेरेवागतः, यदा मूर्धन्यीभूतः।

४६. प्रा.भा.आ. s-ध्वनिः इ.यु * s-ध्वनिरेव।

४७. प्रा.भा.आ. h-ध्वनिः इ.यु * ĝh, *gh, gu̯h- इत्येतेभ्यः आगतः।

### इ.यु. * ĝenos > प्रा.भा. आ janaḥ

janaḥ इत्यस्य इन्दोयुरोपीयप्रतिरूपं भवति * ĝenos इति। वस्तुतस्तु कल्पितमिदम् इन्दो -युरोपीयध्वनिरूपम् इन्दो-युरोपीयभाषान्तर्गतभाषाणां ध्वनिशब्दवाक्यव्यवस्थामनुसृत्यैव भाषातत्त्वविद्भिः निर्णीतम्। इन्दोयुरोपीयभाषान्तर्गतविविधशाखासु शब्दस्यास्य प्रतिरूपाणि यथा -

प्रा.भा.आ. भाषायां - janaḥ

आवेस्तीयभाषायां - zanō

ग्रीकभाषायां - genos

लातिन - genus

गथिक - kuni

आङ्गल - kin

अत एव < इ.यु. * ĝenos

यद्यपि इ.यु.भाषाणां प्रतिरूपाणि दृष्ट्वैव कल्पितमिदं रूपं स्थिरीकृतं तथापि अत्रायं विशेषो यत् कल्पित -इ.यु.-ध्वनिभ्यः एव ग्रीक-लातिन-संस्कृतादिध्वनय उत्पन्ना इत्युच्यते।

इ.यु.-पुरःकण्ठ्यध्वनीनां परिवर्तनं प्रा.भा.आ.भाषायां प्रायशः तालव्यध्वनिषु पश्चात्कण्ठ्यध्वनिषु वा जातम्। अत्र *ĝ इति पुरःकण्ठ्यध्वनिः प्रा.भा.आ.भाषायां j-ध्वनिरूपेण परिणतः।

इ.यु. भाषायां *a, *e, *o इत्येते ध्वनयः प्रा.भा.आ. शाखायां a-ध्वनित्वेन परिणताः। अत्र *e-ध्वनिः, तथा *o-ध्वनिः प्रा.भा.आ.शाखायां a-ध्वनित्वेन परिणतः।

*n-ध्वनिस्तु शाखान्तरेषु अपरिवर्तितस्तिष्ठति। इन्दो-इराणीयशाखायां s-ध्वनिः h-ध्वनौ क्वचित् परिवर्तते। अत्रापि तथैव।

**इ.यु. * esti > प्रा.भा. आ asti**

asti इत्यस्य इन्दो -युरोपीयप्रतिरूपं भवति *esti इति। वस्तुतस्तु कल्पितमिदम् इन्दो -युरोपीयध्वनिरूपम् इन्दो -युरोपीयभाषान्तर्गतभाषाणां ध्वनिशब्दवाक्यव्यवस्थामनुसृत्यैव भाषातत्त्वविद्भिः निर्णीतम्। इन्दोयुरोपीयभाषान्तर्गतविविध -शाखासु शब्दस्यास्य प्रतिरूपाणि यथा - प्रा.भा.आ. भाषायां - asti

प्रा.पा - astiy

ग्रीकभाषायां - esti

लातिन - est

गथिक - ist

आङ्गल - is

अत एव < इ.यु. * esti

यद्यपि इ.यु.भाषाणां प्रतिरूपाणि दृष्ट्वैव कल्पितमिदं रूपं स्थिरीकृतं तथापि अत्रायं विशेषो यत् कल्पित -इ.यु.-ध्वनिभ्यः एव ग्रीक-लातिन-संस्कृतादिध्वनय उत्पन्ना इत्युच्यते।

इ.यु.भाषायां *a, *e, *o -इत्येते ध्वनयः प्रा.भा.आ.शाखायां a-ध्वनित्वेन परिणतः। अत्र * e- ध्वनिः, प्रा.भा.आ.शाखायां a-ध्वनित्वेन परिणतः। *s-ध्वनिः, t-ध्वनिः, i-ध्वनिस्तु अत्र अपरिवर्तिताः सन्ति।

**इ.यु. * de(o)nt > प्रा.भा. आ danta**

प्रा.भा.आ.- danta

ग्रीक – odōn

लातिन – dēns

आङ्गल – tooth

अत एव < इ.यु. * de(o)nt

यद्यपि इ.यु.भाषाणां प्रतिरूपाणि दृष्ट्वैव कल्पितमिदं रूपं स्थिरीकृतं तथापि अत्रायं विशेषो यत् कल्पित -इ.यु.-ध्वनिभ्यः एव ग्रीक-लातिन-संस्कृतादिध्वनय उत्पन्ना इत्युच्यते।

इ.यु.भाषायां * d-ध्वनिस्तु प्रा.भा.आ भाषायाम् अपरिवर्तितः। इ.यु. *a, *e, *o – इत्येते ध्वनयः प्रा.भा.आ.शाखायां a-ध्वनिरूपेण परिणतः। अत्र *e-ध्वनिः अथवा o-ध्वनिः प्रा.भा.आ.शाखायां a-ध्वनिरूपेण परिणतः। *n-ध्वनिस्तु शाखान्तरेषु सर्वत्र अपरिवर्तितः। *t-ध्वनिरपि अपरिवर्तितः। अत्रायं विशेषो यत् इ.यु. *de(o)nt – इत्यत्र *t-ध्वनेः परं नास्ति a-ध्वनिः, किन्तु प्रा.भा.आ.शाखायां a-ध्वनेरागमः जातः। तेन danta-इति रूपम्। शाखान्तरेषु क्वचित् *e-ध्वनिः, *o-ध्वनिरूपेण परिवर्तितः तस्मात् क्वचित् *dont इति रूपमपि दृश्यते।

-----

ʕ > √ þ u̯ ə